CC-0. In Public Domain. Digitization by eGangotri

THE

HARIDAS SANSKRIT SERIES

62

THE

TARKAMAKARANDA

BEING QUESTIONS & ANSWERS OF ANNAM BHATTA'S TARKA DĪPIKĀ

By

BĀLA KAVI

PANDIT KEVALĀ NANDA S'ARMĀ

PUBLISHED BY

JAYA KRISHNA DAS HARI DAS GUPTA

The Chowkhamba Sanskrit Series Office.

BENARES.

1937.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Registered According to Act XXV of 1867,
All Rights Reserved by the Publisher

PRINTED BY
JAYA KRISHNA DAS GUPTA,
VIDYA VILAS PRESS, BENARES CITY.

1937.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

६२

तर्कमकरन्दः ।

काशीस्थ-राजकीय संस्कृतसकलमध्यमापरीक्षासु निर्धारितायाः

श्रीमदन्नम्भट्टकृततर्कदीपिकायाः प्रश्नोत्तररूपः ।

काशीस्थ नित्यानन्द वेद विद्यालयीय प्रधानाध्यापक-न्यायाचार्य-
गुरुवर पं० दुण्ढिराजशास्त्रिचरणानुगृहीतेन

अज्ञेयोपाह्व-बालकवि-केवलानन्दशर्मणा प्रणीतः ।

प्राप्तिस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

१९९४

[राजशासनानुसारेण सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तिस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी।

१९९४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुष्पोपहाराञ्जलिः—

ईशानभूतेशगिरीशवर्ज,
गुरोर्गरीयांसमवैमि नाहम् ।
तस्मादिमां तुच्छकृतिं हि तेषां,
पादारविन्दे परिकल्पयामि ॥ १ ॥

विश्वविख्यात विद्वद्रत्नचक्रचूडामणीनामाचार्यचरणानां परम-कारुणिकानां, सत्यान्वीक्षिकीवल्लभानां, श्रीढुण्ढिराजशास्त्रिणां न्यायाचार्याणां चरणारविन्दे तुच्छामिमामञ्जलिमुपस्थापयामि ।

आशासे प्रतिपद्यानुचरमनुगृह्णीष्यन्ति ।

इति सादरं निवेदयति—
भवतां क्षुद्रान्तेवासी—
केवलानन्दः
"अज्ञेयः"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काशीस्थराजकीयसंस्कृतपाठशालीय न्यायशास्त्रप्रधाना-
ध्यापकानां न्यायाचार्य पण्डित श्रीशिवदत्तमिश्राणां

सम्मतिपत्रम्

अयं तर्कमकरन्दो दीपिकाप्रश्नोत्तररूपश्छात्रानुपकरिष्यतीत्यत्राऽ
विवाद एव, लेखनशैली चातीवमनोहरा ।
एवं कुर्वाण एव लुप्तप्रायं न्यायशास्त्रं-समुद्धरिष्यति
केवलानन्दशर्म्मा—इत्याशासे

श्री-शिवदत्तमिश्रः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वित्राः शब्दाः ।

अयि विद्वद्रत्नचक्रचूडामणयः ? धीराः ? अमितसरससरल-गद्यपद्यनिचयरचनाचातुर्यचतुराः ! प्रतीच्यवराः ! सानुनयं सविनयं सादरं बद्धाञ्जलिरिदमावेदयते, यन्मन्ये 'मघवामूलं विडौजा टीके'त्यत्र सादरं सामोदं सोत्साहं सत्वरं सप्रशंसं, मञ्जुलदृग्मिलिन्दनिपातै-कपक्षपातिनां भवादृशां कृते तुच्छोऽयं निबन्धो न प्रमोदावहो भवि-ष्यति, परं नायं प्रयासस्तथाविधानां विपश्चितां कृते, परन्तु मध्य-माऽध्येतॄणां बटूनाम्, कुतोऽयं कथमियद्धनं केन कदायं निर्गमिष्य-तीति चिन्तयन् सदीपिके राजकीयसंस्कृतमध्यमापरीक्षासु निर्धारिते तर्कसङ्ग्रह सर्वेषां तटस्थ्यं नैराश्यभावमधिगम्य छात्राणां प्रमो-दायाऽत्र कृतप्रयत्नोऽस्मि । इदमपि कारुणिकं दयासागरं भवाम्बो-धिपोतं जगदीश्वरं सदा प्रार्थये यत् सरलया वाचा सर्वथा छात्राणां कार्यान्तरायमपहाय कथंचिदपि किंचिदपि कदाचिदपि कृतसाहाय्यो भवेयमिति ।

छात्राणां क्षुद्रबन्धुः

केवलानन्दशर्मा

"अज्ञेयः" ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तर्कमकरन्दः ।

श्रीमदन्नम्भट्टकृततर्कदीपिकाप्रश्नोत्तररूपः ।

तत्र प्रथमचषकः ।

सुरमुनिनरवृन्दैर्वन्दनीयं विशुद्धं कलकलरवनादैः स्तौति यं पक्षिवृन्दम् ।
श्रुतिरपि च विभिन्ना यस्य पारं न याता विततप्रमदराशिं वन्दते तं जनोऽयम् ॥ १ ॥

खगैर्जटानिर्मितनीडवृन्दं सम्पुत्तिकाक्रान्तविशुद्धदेहम् ।
स्थाणूपमं चाविचलं मुनीन्द्रं नमामि चित्तेन तमक्षपादम् ॥ २ ॥

चाञ्चल्यदोषाच्छिशुमन्दबुद्धिर्बालः प्रवृत्तोऽस्म्यहमत्र कार्ये ।
तथापि मन्ये दयया गुरूणां ममापि सिद्धा भविता प्रवृत्तिः ॥ ३ ॥

आन्वीक्षिकीयं प्रकृतेर्दुरूहा विज्ञा विदन्त्येव विचारशीलाः ।
तस्माद् बटूनामधिगम्य खेदं दुःसाहसेऽहं त्वरितं प्रवृत्तः ॥ ४ ॥

हितं कथंचिद्धि भवेदनेन स्वल्पं च केषामपि चेत्कदाचित् ।
मन्ये तदाहं विशदान्तरात्मा जातोऽस्मि सद्यः सफलप्रयत्नः ॥ ५ ॥

मात्सर्यं सर्वमुत्सार्य कृत्वा च करुणां मयि ।
पण्डितैरपि वीक्ष्योऽयं मकरन्दो मुदावहः ॥ ६ ॥

१ मङ्गलस्य निष्फलत्वं प्रतिपाद्य तत्साफल्यं प्रतिपादय ।

(प्र०) ननु मूले "निधाय हृदि विश्वेशं"मित्यादिकं भगवच्छिवनमस्कारभूतं मङ्गलमाचरितम्, परं नैतन्मनोरमम् । निष्फलत्वात् । न च समासिरेव तत्फलमिति वाच्यम् । कार्यकारणभावनियामकान्वयव्यतिरेकव्यभिचारात् । तथाहि—

कारणसत्त्वे कार्यसत्त्वमन्वयसहचारः । कारणाभावे कार्याभावो व्यतिरेकसहचारः । एवञ्च तत्सत्त्वे तदभावोऽन्वयव्यभिचारः । तदभावे तत्सत्त्वं व्यतिरेकव्यभिचारः, इति कार्यकारणभावस्य व्यभिचारस्य च स्वरूपम् । तत्राद्यं दण्डघटयोर्दृष्टं ननु मङ्गलसमाप्त्योः । द्वितीयं चात्र विराजते सर्वाङ्गरूपेण । कुत ? इति चेत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केषुचिद् ग्रन्थेषु मङ्गलसत्त्वेऽपि तदभावात् । कुत्रचिच्च तदभावेऽपि समाप्ति रूपकार्यदर्शनात् । इदं चात्र पूर्वपक्षिणोऽनुमानम्—

"मङ्गलं निष्फलं फलविशेषशून्यत्वात्, जलताडनादिवत् । यन्नैवं तन्नैवं यथा यज्ञादिकं वेति ॥

(उ०) मैवम् । यत्र मङ्गल सत्त्वेऽपि समाप्त्यभावस्तत्र विघ्नबाहुल्य मङ्गलन्यूनत्वं च कल्प्यते । समसंख्याकविघ्नध्वंसद्वारकसमाप्तिं प्रति समसंख्याकमङ्गलत्वैव कारणत्वात् । नहि शमीवृक्षं प्रभवति मन्दमरुदुत्पाटयितुम् । यत्र च मङ्गलाभावेऽपि समाप्तिसत्त्वं तत्र जन्मान्तरीयं तत्कल्प्यते, स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचारः । अयं चात्र सिद्धान्तिनोऽनुमानप्रकारो बोध्यः—

मङ्गलं सफलं अविगीतशिष्टाचारविषयत्वाद्दर्शादिवत्, मङ्गलं 'समाप्तिफलकं—समाप्त्यन्याफलकत्वे सति सफलत्वात् यज्ञादिवत् । यन्नैवं तन्नैवं यथा जलताडनादिकं वेति ॥

२ मङ्गलस्य कर्तव्यत्वे किं प्रमाणम् ?

(प्र०) ननु मङ्गलं समाप्तिकलकं समाप्त्यन्याफलकत्वे सति सफलत्वादिति परिशेषानुमानेन मङ्गलस्य कर्त्तव्यत्वं साधितम् । तत्र च मङ्गलं सफलं अविगीतशिष्टाचारविषयत्वादित्यनुमानेन विशेष्यासिद्धिनिरासः कृतः । सफलत्वं च बलवदनिष्टाननुबन्धित्वे सतीष्टसाधनत्वम् । एवञ्च मङ्गलेन समाप्तिसिद्धावपि निर्विघ्नपरिसमाप्त्यर्थं ग्रन्थादौ मङ्गलमेव कर्तव्यमित्यत्र मानाभावः, इति चेन्न ।

(उ०) शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् । "समाप्तिकामो मङ्गलमाचरेदि"ति श्रुतेः । तथाहि—मङ्गलं वेदबोधितकर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत् । भोजनादौ व्यभिचारवारणाय अलौकिक इति । अर्थाद्विगीतशिष्टाचारविषयत्वादित्युपादाने व्यभिचारः । कुतः ? भोजनं शिष्टा अशिष्टा वा सर्व एव कुर्वन्ति तेन तयोः को विशेषः ? अत उक्तमलौकिकेति । तथा च भोजनं नाऽलौकिकम् । रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति । अयमाशयः—विधिप्रतिपादितसमय एव कर्म सफलं भवति नाऽन्यथा । तेन च मध्याह्नवेलामतिक्रम्य रात्रौ यज्ञादिकं करोति तन्नाऽनिष्टाननुबन्धि किन्तु बलवदनिष्टाऽनुबन्ध्येव, अत उक्तम्-अविगीतेति । शिष्टपदं स्पष्टार्थमित्यन्यत्र विस्तरः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३ विभागादेव सप्तत्वे प्राप्ते सप्तग्रहणस्य किं प्रयोजनम् ।

(प्र०) ननु मूले पदार्थविभागावसरे सप्तपदार्थविभाजकोपाधिमत्त्वरूपं सप्तपदं गृहीतम् । अत्र पृच्छ्यते—विभागादेव सप्तत्वे लब्धे सप्तग्रहणं किमर्थमिति चेन्न ।

(उ०) अधिकसंख्याव्यवच्छेदार्थत्वात् ।

(प्र०) ननु तथाप्यन्यः पदार्थः प्रमितो न वा ? नाद्यः । यद्यस्ति ? तत्खण्डनं किमर्थम् ? किमपराद्धं तेन वराकेण ? अथ नास्ति चेत् ? प्रतियोगिप्रमितिं विना तत्खण्डनमप्यसंभाव्यम् । निषेधात्मकखण्डनं प्रत्यपि प्रतियोगिनः कारणत्वात् । नहि कश्चिच्छशकविषाणं निराकरोति ।

(उ०) मैवम् । पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वादिति ।

(प्र०) ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वं, एवं च सप्तभिन्नत्वाश्रयस्याभावात्सप्तान्यतमत्वमेवानुपपन्नमिति । अयमभावः—घटभिन्नभिन्न इत्यस्यार्थो तदैव घटो भवितुमर्हति यदा घटाद्भिन्नः पटः पृथिव्यामस्ति, यथात्र घटाद्भिन्नः पटस्तद्भिन्नो घटः, तथा प्रकृते सप्तभिन्नमित्यनेन कस्य ग्रहणं ? येन तद्भिन्नं सप्तान्यतमं भवेदिति चेन्न ।

(उ०) द्रव्यादिसप्तान्यतमत्वं नाम—द्रव्यादिभेदसप्तकाभाववत्त्वम् । तथा च—द्रव्यादिभेदानां प्रत्येकं प्रसिद्धानां सप्तपदार्थानां कुत्राप्यसत्त्वेन तादृशभेदस्य एकत्वावच्छिन्नाभावस्य सर्वत्र सत्त्वान्न दोष इति भावः ।

(प्र०) ननु तथापि सप्तान्यतमत्वपदार्थत्वयोर्व्याप्तिलाभाय भवता सप्तग्रहणं कृतम्, परमत्र व्याप्यव्यापकभावाभावान्न तत्सम्भाव्यते । यथा यद्यपि यत्र धूमस्तत्र वह्निरित्येषा व्याप्तिः संघटते तथापि न यत्र वह्निस्तत्र धूम इति, अयोगोलके व्यभिचारात् । प्रकृते तु यत्र पदार्थत्वं तत्र सप्तान्यतमत्वमित्यपि सम्यक् यत्र सप्तान्यतमत्वं तत्र पदार्थत्वमित्यपि सम्यक् । तथा च व्याप्यव्यापकभावाभावान्न व्याप्तिसम्भव इति चेन्न ।

(उ०) समविषमभेदेन व्याप्तेर्द्वैविध्यात् । तथा च समानव्याप्यव्यापकभावरूपेयं व्याप्तिरिति भाव इत्यलमतिविस्तरेण ॥

४ तमसो दशमद्रव्यत्वं निराक्रियताम् ।

(प्र०) ननु मूले "पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रव्याणी"त्युक्तम्। नैतच्चारु। तमसो दशमद्रव्यस्य विद्यमानत्वात्। न च तत्सत्त्व एव किं प्रमाणमिति वाच्यम्।

"तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धनववैधर्म्यादेतेभ्यो भेत्तुमर्हती"त्यभियुक्तोक्त्या तमसो द्रव्यत्वसिद्धेः। एष्वेव तस्यान्तर्भाव इत्यपि न वाच्यम्। तमसो रूपिद्रव्यत्वान्नाकाशादिपञ्चकेऽन्तर्भावः, स्पर्शाभावान्न जलादित्रिकेऽप्यन्तर्भावः, अत एव गन्धाभावाच्च न पृथिव्याम्। अतस्तमसो द्रव्यत्वं सिद्धमेवेति चेत्।

(उ०) न। तमसस्तेजोऽभावरूपत्वात्। तथाहि तमो हि न रूपवद्द्रव्यं, आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत्। यत्र यत्र रूपवद्द्रव्यत्वं तत्र तत्रालोकसहकृतचक्षुर्ग्राह्यत्वं यथा घट इति व्याप्तेः।

न च नीलं तम इति प्रतीतेस्तु तस्य द्रव्यत्वं सिद्धमेवेति वाच्यम्। तस्या भ्रमरूपत्वात्, दीपापसारणादेव तथा प्रतीयमानत्वात्। किञ्च तमसो द्रव्यत्वाङ्गीकारे तत्प्रागभावतद्ध्वंसादिकल्पनात्तत्रैव गौरवमित्यन्यत्र विस्तरः॥

५ लक्षणस्य किं लक्षणम्?

(प्र०) अयम्भावः-लक्ष्यतावच्छेदकसमनियतत्वं लक्षणलक्षणत्वम्। ननु तथापि लक्ष्यतावच्छेदकसमनियतत्वस्य लक्षणलक्षणत्वे लक्षणस्य व्यावृत्तिरेव प्रयोजनमिति मते व्यावर्तकस्यैव लक्ष्यतावच्छेदकसमनियतत्वरूपलक्षणलक्ष्यतया व्यावृत्त्यादावतिव्याप्तिरिति चेन्न।

(उ०) व्यावर्तकस्यैव लक्षणलक्षणत्वे व्यावृत्तावभिधेयत्वादौ चातिव्याप्तिवारणाय तदभिन्नत्वं धर्मविशेषणं देयम्। तथा च तदभिन्नत्वे सति लक्ष्यतावच्छेदकसमनियतत्वं लक्षणलक्षणत्वमिति पर्यवसन्नम्। तत्पदेनाऽत्र लक्ष्यतावच्छेदकभिन्नव्यावृत्तिप्रमेयत्वादेर्ग्रहणम्, आदिपदेनाभिधेयत्वादीनां च, तथा च नायं दोषः, तेषामपि भिन्नतया निर्देशात्।

यस्य च मते व्यवहारोऽपि लक्षणस्य प्रयोजनं स्यात् तदा तदविशेषणमनावश्यकम्, इतरभेदस्यापि व्यवहारसाधनत्वात्॥

६ अव्याप्त्यादिदोषाणां सोदाहरणो लक्षणनिर्देशः कर्तव्यः

(उ०) अयमत्राभिसन्धिः-इह न्यायशास्त्रे त्रयो लक्षणदोषा भवन्ति-अव्याप्त्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिव्याप्त्यसम्भवाश्रेति। तत्र लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। यथा–गोः कपिलत्वम् तत्र लक्ष्या गौः, तदैकदेशे कपिलत्वस्य वृत्तित्वादिति। लक्ष्यतावच्छेदकत्वेनाभिमतधर्मसमानाधिकरणात्यन्ताभावप्रतियोगित्वमिति यावत्। तथा च लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वे सति लक्ष्यतावच्छेदकसामानाधिकरण्यमव्याप्तेर्लक्षणम्। अलक्ष्यवृत्तित्वमतिव्याप्तिः। लक्ष्यमतिक्रम्य वर्तत इत्यतिव्याप्तिदोष इत्यर्थः। यथा—गोः शृंगित्वम्। अत्र लक्ष्यवृत्ति शृङ्गित्वं, परमजामहिष्यादिष्वपि तत्सत्त्वादतिव्याप्तिः। लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकसामानाधिकरण्यमतिव्याप्तिः। असम्भवलक्ष्यैकशफत्वादावतिव्याप्तिवारणाय सत्यन्तम। कपिलत्वादावनतिप्रसङ्गाय विशेष्यदलम्। लक्ष्यमात्रावर्तनमसम्भवः। यथैकशफत्वं गोत्वम्।

लक्ष्यतावच्छेदकावच्छिन्नाभावप्रतियोगित्वमसम्भवत्वमित्यर्थः॥

७ प्रतिपद्व्यावृत्तिपुरःसरं द्रव्यलक्षणं प्रतिपादनीयम्।

(उ०) द्रव्यत्वावच्छिन्नत्वे सति गुणकर्मकाधेयतानिरूपिताधिकरणत्वं द्रव्यत्वमिति द्रव्यनिष्कृष्टलक्षणं पर्यवसन्नम्।

ननु गुणकर्मकाधेयतानिरूपिताधिकरणत्वं न द्रव्यस्य लक्षणम्, "प्रथमक्षणे निर्गुणं द्रव्य"मिति न्यायेन आद्यक्षणोत्पन्नविनष्टद्रव्यादौ गुणाभावात्, आकाशादौ क्रियाऽभावादव्याप्तेश्रेति।

मैवम्। गुणकर्मसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात। सत्ताजातिमादाय गुणादावतिव्याप्तिवारणाय सत्ताभिन्नेति।

ननु तथापि "एकं रूपं रसात् पृथगि"त्यादावतिव्याप्तेः। तथा हि–रूपमपि गुणः, एकत्वावच्छिन्नैकसंख्यापि गुणः, एवं च एकं रूपमित्यत्र "गुणगुणिनोः समवायः" इति न्यायादेको घट इत्यत्रैकसंख्याया अधिकरणं समवायेन यथा–घटस्तथा प्रकृते रूपमपि, एवं च गुणस्याधिकरणं गुणोऽपि संवृत्तः, अतः पूर्वोक्तलक्षणं न निर्दुष्टमिति चेन्न। एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात्। अयमाशयः—यस्मिन् द्रव्ये तद्रूपमाश्रितं तस्मिन्नेव सैकत्वसंख्यापि, परं "एकं रूपं" इति प्रतीतिस्तु केवलं व्यवहारायैव नह्येषा पारमार्थिकीत्यलमतिविस्तरेण॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८ दीपिकाकारोक्तं सपदकृत्यं कर्मलक्षणं प्रतिपाद्य कतिविधं कर्म, कुत्र वर्तते ? तस्य नित्यत्वमनित्यत्वं वेति च प्रतिपादनीयम् ॥

(उ०) इदमवधेयम्–संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । कार्यां कार्यसंयोगासमवायिकारणं संयोगोऽपि भवति, अतस्तत्र व्यभिचारवारणाय सत्यन्तम् । रूपादावतिप्रसङ्गनिरासाय विशेष्यदलम् । उत्क्षेपणादिभेदेन पञ्चविधं कर्म । ननु भ्रमणादीनामप्यतिरिक्तत्वे पञ्चग्रहणं व्यर्थमिति चेन्न । भ्रमणादीनामप्यत्रैवान्तर्भावात् । तथा हि–

"भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च । तिर्यग्गमनमप्यत्र गमनादेव लभ्यते" इति । न च गमनोपादानादेव निर्वाहे पञ्चत्वकथनमपि व्यर्थमिति वाच्यम् ।

स्वतन्त्रेच्छेन मुनिना पृथगुपदेशादिति ।

अथ समनःपृथिव्यादिचतुष्के तस्य वासः । तृतीयक्षणध्वंसप्रतियोगि कर्मेति तस्यानित्यत्वमेव । नेदं कर्मलक्षणं, ज्ञानादावतिव्याप्तेरपितु तस्य स्वरूपकथनमित्यन्यत्राकरादिषु विस्तरः ॥

९ 'गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वं तत्त्व'मिति कस्यलक्षणं ? किं वैतस्य प्रयोजनम् ?

(प्र०) अयमत्र पूर्वपक्षाशयः—मूले "गन्धवती पृथ्वी"त्युक्तम् । किन्तु नैतन्मनोरमम् । सुरभ्यसुरभ्यवयवारब्धे द्रव्ये गन्धाप्रतीतेरव्यासेः ।

न च तत्र चित्रगन्धोऽस्त्येव, अन्यथा तत्र प्रत्यक्षात्मिका या प्रतीतिर्भवति साऽप्यनुपपन्ना स्यादिति वाच्यम् ।

चित्ररूपमिव चित्रगन्धस्य नैयायिकैरनभ्युपगमादिति । किंचोत्पन्नविनष्टघटादावव्याप्तेरिति ।

(उ०) मैवम् । गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात् । जलत्वादिरूपद्रव्यत्वव्याप्यजातिमादाय जलादावतिव्याप्तिवारणाय गन्धसमानाधिकरणेति ।

द्रव्यत्वमादाय जलादावतिप्रसङ्गवारणाय द्रव्यत्वापर इति । इदमेव चास्य प्रयोजनं बोध्यम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१० किमिन्द्रियत्वं ? का च तल्लक्षणे प्रतिपदव्यावृत्तिः ?

(उ०) शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमितीन्द्रियसामान्यलक्षणम् ।

तत्र चात्मादिवारणाय सत्यन्तम् । उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वाच्छब्देतरेति । विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति । यद्यपि आलोकसहकृतमुद्भूतरूपमेव पदार्थं चक्षुर्गृह्णाति तथापि चक्षुषि यद्रूपं वर्तते तत्त्वनुद्भूतमेव । सामान्यगुणस्य संयोगादेरात्मनि विद्यमानत्वाद्विशेष इति ।

विषयेन्द्रियावयवसंयोगस्य प्रत्यक्षजनकतया तदाश्रयस्येन्द्रियावयवस्य वारणाय मनःपदमित्यादिकमूह्यम् ॥

११ सुवर्णस्य तैजसत्वं साध्यताम् ।

(प्र०) ननु मूले तेजसो विषयविभागावसरे प्रोक्तं मूलकृता—

"आकरजं सुवर्णादि" रिति । तन्न युक्तं सुवर्णस्य पार्थिवत्वात् । तथाहि—सुवर्णं पार्थिवं पीतत्वात् गुरुत्वाद्, हरिद्रावत्, यन्नैवं तन्नैवं यथा सूर्यरश्मिर्वेति । वन्हिज्वालायामस्वरसं ज्ञात्वाह गुरुत्वादिति । तैजसत्वाभावसाधको वायं हेतुरिति निर्दुष्टपूर्वोक्तानुमानात्तस्य पार्थिवत्वसिद्धेरिति चेन्न ।

(उ०) अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन, जलपूर्णकटाहनिक्षिप्तघृतादौ द्रवत्वनाशादर्शनेन चासति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् । सुवर्णस्य चात्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः ।

अत्रायं सिद्धान्त्यभिमतानुमानप्रकारो बोध्यः—

सुवर्णं तैजसं, अत्यन्तानलसंयोगे सति तद्द्रवत्वनाशादर्शनात्, यन्नैवं तन्नैवं यथा घृतमिति ।

तस्य च रूपाधिकरणत्वेन न वाय्वादिपट्केऽन्तर्भावः ।

नैमित्तिकद्रवत्ववत्वान्न जले, जलस्य सांसिद्धिकद्रवत्वाधिकरणत्वात् । इति परिशेषानुमानेन तस्य तैजसत्वसिद्धिप्रकारो ज्ञेयः ।

नच तैजसोष्णस्पर्शभास्वरशुक्लरूपयोस्तत्र कथमनुपपत्तिरिति वाच्यम् । तयोः पार्थिवानुष्णाशीतस्पर्शपीतरूपाभ्यामभिभवात् । ननु तथाप्यत्यन्तानलसंयोगे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सति पार्थिवपूर्वरूपस्पर्शादिनाशनियमेन सुवर्णं कथं न पार्थिवपीतरूपनाश इति चेन्न । पार्थिवपीतरूपनाशप्रतिबन्धकत्वेनैव विलक्षणद्रवद्रव्यस्याङ्गीकारादिति । न च तस्य तैजसत्वे सुवर्णसहकृतचक्षुषा तमसि पदार्थसाक्षात्कारापत्तिरिति वाच्यम् । उद्भूतरूपस्यैव तत्र कारणत्वात् । नव्यास्तु सुवर्णं पार्थिवमेवेत्याहुः । प्रमाणन्त्वन्यत्र द्रष्टव्यम् इत्यलं व्यासेन ॥

१२ वायुसद्भावे किं प्रमाणम् ?

(प्र०) अत्रेदमाकूतम्-मूले "रूपरहितः स्पर्शवान्वायु"रित्युक्तम् । अत्र पृच्छ्यते-वायुसत्त्वे किं मानम् ? नहि तत्र प्रत्यक्षं प्रमाणम् । रूपाभावात् । नाप्यनुमानम् । लिङ्गाभावात् । नाप्युपमानं सादृश्याभावात् । नापि शाब्दः, तथाविधागमाभावादिति चेन्न ।

(उ०) अनुमानप्रमाणस्य जागरूकत्वात् । तथाहि—

यो यं वायौ वाति सति विलक्षणस्पर्शो भासते स कुत्राप्याश्रितो गुणत्वात् रूपवत् । यो यो गुणः स स द्रव्याश्रितो यथा रूपमित्यर्थः । न चास्याकाशादिपञ्चकमाश्रयः स्पर्शाभावात् । न जलतेजसी, तत्र शीतोष्णस्पर्शवत्त्वादत्र च विलक्षणानुष्णाशीतस्पर्शवत्त्वात् । नापि पृथिवी, तत्रोद्भूतस्पर्शवतः पार्थिवस्योद्भूतरूपवत्त्वनियमात् । तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुरिति परिशेषानुमानेन वायोः सिद्धिप्रकारो बोद्धव्यः ॥

१३ वायोः प्रत्यक्षं भवति नवा ? भवति चेत्केषाम्मते ?

(प्र०) अयमत्राभिसन्धिः-ननु वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वाद् घटवत् । यन्नैवं तन्नैवं यथा गगनमित्यनुमानेन वायोः प्रत्यक्षत्वसिद्धेरिति चेन्न ।

(उ०) उद्भूतरूपवत्वस्योपाधित्वात्, यदुक्तम्—"उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये" इति । अयमाशयः-यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्वं यथा-घटादिरित्येषा व्याप्तिः । वायोस्तु तथाविधाभावात् प्रत्यक्षाभाव इत्येवं घटादौ साध्यव्यापकत्वम् । यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्रोद्भूतरूपवत्त्वं नास्तीति प्रकृतपक्षे साधनाऽव्यापकत्वम् ।

एवञ्च "साध्यव्यापकत्वे सति साधनाऽव्यापकत्व"मित्युपाधिलक्षणं प्रकृतेऽपि यथार्थम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न चैवं तप्तवारिस्थतेजलोऽप्यप्रत्यक्षत्वापत्तिरिति वाच्यम् । इष्टापत्तेः । तस्माद्रूपरहितत्वाद् वायुरप्रत्यक्ष इति भूम्ना वैशेषिकमतं दर्शितम् । "वायुः प्रत्यक्षः" इत्यक्षपादाः । "अप्रत्यक्ष" इत्येकदेशिनः । प्रमाणन्त्वन्यत्र द्रष्टव्यम् ।

१४ परमाणुसद्भावे किं प्रमाणम् ?

(प्र०) इदमत्र चार्वाकः शङ्कते—

ननु प्रकृतेः स्वभावादेवेदं जन्यं जगत्, नात्र कोऽपि कर्ता कारणं वा ।

नापि परमाणोः सद्भावे किमपि प्रमाणमाकलयामः; सर्वमिदं प्रपंचनमेवेति ।

(उ०) तद् हास्यास्पदम् । जालसूर्यमरीचिस्थं सूक्ष्मं यद्रजो दृश्यते तत्सावयवं चाक्षुषद्रव्यत्वात् पटवत् । तदेव च त्रसरेणुः । महत्परिमाणादेर्गगनादौ विश्रान्तेरणुपरिमाणस्यापि क्वचिद् विश्रामो वाच्यः । न चात्रैव विश्रान्तिरस्त्विति वाच्यम् । वक्ष्यमाणानुमानेन तत्सावयवत्वसिद्धेः-त्रसरेणोरवयवाः सावयवा महदारम्भकत्वात् तन्तुवत् । इत्यनुमानेन द्व्यणुकस्य सावयवत्वसिद्धेः । न चैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यम् । अनवस्थाप्रसङ्गात्, मेरुसर्षपयोरपि साम्यापत्तेः । अथ केयमनवस्था ? अत्रोच्यते—

अव्यवस्थितपरम्परारोपाधीनोऽनिष्टप्रसङ्गोऽनवस्था ।

तथा हि—त्वन्मते नापि मेरोरवयवानामवसानं, नापि सर्षपस्य च । अत एव च आत्रसरेण्वन्तर्गतेऽपि मेरुसर्षपयोस्तथैवाऽवयवाः पुनश्च तथैव, किमधिकं नापि मेरोरवयवानामन्तो नापि सर्षपस्य । मन्मते तु सर्षपस्य शकलकरणे त्वरितमवसानं लप्स्यते मेरोस्तु न कल्पान्तरेऽपि, तेन नेयमनवस्था । अतो यत्रावयवाऽन्तोस्ति स परमाणुः ॥

१५ आकाशस्य किं लक्षणं ? गुणपदस्य का व्यावृत्तिः ? भूतत्वमूर्तत्वे च के ? उत्पन्नः शब्दः कथं गृह्यते ? आकाशे के गुणाः ? इति च प्रतिपादनीयम् ।

(उ०) समवायेन शब्दत्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वमाकाशत्वम्, शब्दगुणकमाकाशं वा । अत्र प्रकृतमूललक्षणे गुणपदमाकाशे शब्द एव विशेषगुण इति द्योतनाय । विशेषगुणाश्च रूपादयः । तदुक्तं विश्वनाथेन—

"रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः । बुद्ध्यादि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावनान्ताश्च शब्दौ वैशेषिका गुणा" इति । गगनं विभु नित्यं च ।

विभुत्वञ्च किमिति चेत् । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वमिति बोध्यम् । मूर्तत्वं च क्रियावत्त्वम् । पृथिव्यप्तेजोवायुमनांसि मूर्तद्रव्याणि । बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं भूतत्वम् । पृथिव्यप्तेजोवाय्वाकाशानां पञ्चकं भूतपदवाच्यम् । यदुक्तं भगवताऽक्षपादेन—

"पृथिव्यापस्तेजो वायुराकाशमिति भूतानी"ति । आकाशकालदिगात्मद्रव्याणि विभूनि, पृथिव्यादिपञ्चकपरमाणवो गगनादिपञ्चकञ्च नित्यद्रव्याणीत्युच्यन्ते ।

यद्यपि देवदत्तमुखोच्चरितशब्दस्तृतीयक्षणे नश्यति तथापि वीचीतरङ्गन्यायेन तदुत्पत्त्या अतिदूरस्थोऽपि यज्ञदत्तः शृणोति । शब्दो नित्यो नवेति प्रष्टे विवेचयिष्यते ।

१ संख्या २ परिमाण ३ पृथक्त्व ४ संयोगाः सामान्यगुणाः, शब्दश्च विशेषगुण इति षड्गुणाः गगनस्य ज्ञेयाः ।।

१६ ईश्वरसत्त्वे किं मानम् ? ।

(प्र०) यं देवं किमधिकं कारवोऽप्युपासते तस्मिन्प्रभाववति भगवति भवे सन्देह एव कुतः ? तथापि लोकायतिकः शङ्कते—

नन्वीश्वरसद्भावे किं प्रमाणम् ? न तावत्प्रत्यक्षम् ।

यद्यस्ति चेद् बाह्यं, आभ्यन्तरं वा ? ।

नाद्यम् । अरूपिद्रव्यत्वात् । निराकारस्य प्रत्यक्षासम्भवात् । नान्त्यम् । आत्मसुखादिव्यतिरिक्तत्वात् । नाप्यनुमानम् । लिङ्गाभावात् । अनुमाने लिङ्गस्य व्याप्तिज्ञानादेः कारणत्वात् । नाप्यागमः । आगमस्यापि तस्यैव प्रतिपादकत्वेन प्रामाण्यात् तत्रैव सन्देहे कुतस्तद्वाक्यस्य प्रामाण्यम् । इत्येवं साधु सिद्धमीश्वरकल्पनमिति ।

(उ०) मैवम् । अनुमानप्रमाणस्यैव जागरूकत्वात् । तथाहि—क्षित्यंकुरादिकं कर्तृजन्यं कार्यत्वाद् घटवदिति ।

न च क्षित्यंकुरादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशवदिति—सत्प्रतिपक्षान्न सिद्धान्तिमतसिद्धिरिति वाच्यम् । त्वन्मते शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं मास्त्विति व्यभिचारशङ्कानिवारकानुकूलतर्काभावात् मम तु कार्यकारणभाव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एव कार्यत्वमस्तु कर्तृजन्यत्वं मास्त्विति व्यभिचारशंकानिवारकोऽनुकूलस्तर्क इति इति सूक्ष्मीभव । इत्थं चानुमानेन तत्सिद्धौ—"तद्वचनादाम्नायस्य प्रामाण्यमिति" निर्देशात्—"सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्" "यः सर्वज्ञः स सर्ववित्" इत्यादेरपि तत्र प्रामाण्यमभ्युपगन्तव्यम् ।।

१७ आत्मनः शरीरेन्द्रियव्यतिरिक्तसिद्धिः करणीया ।

(प्र०) ननु इच्छाद्वेषादि लक्षणं कृतं नैयायिकैरात्मनः, तत्रैव मानाभावात्कथं तत् संगच्छते ? मनुष्योऽहं ब्राह्मणोऽहं गौरोऽहमित्यादिप्रतीतेः शरीरमेवात्मेति प्रतीत्या तत्रैवेच्छादिसम्भवादिति चेन्न ।

(उ०) शरीरस्यात्मत्वे करपादादिनाशे शरीरनाशादात्मनोऽपि नाशापत्तेः । नापीन्द्रियाणामात्मत्वम्, तथात्वे योऽहं घटमद्राक्षं सोऽहं स्पृशामीति प्रतीतेरनुसन्धानाभावप्रसङ्गात्, अन्यानुभूतेरन्यस्यानुसन्धानायोगात् । तस्मादेतादृशं किञ्चित्कल्प्यं यस्याधिकारे स्पर्शनकर्ता हस्तोऽपि कार्यं करोति, चक्षुरपि च। स चैकेन पश्यति एकेन च स्पृशति।

अत एव वदति योऽहं देवदत्तश्चक्षुषाऽद्राक्षं सोऽहमिदानीं करेण स्पृशामीत्येवमात्मा शरीरादिव्यतिरिक्तः सिद्धः ।।

१८ आत्मनो विभुत्वे किं मानम् ।

अथात्मा "अणु परिणामवानि"ति माध्ववेदान्तिनः । तन्न । तथा सति परमाणुरूपजीवस्य हृदये वासात् करचरणादिदुःखसुखप्रतीतेरभावप्रसङ्गात्, तत्र तदसत्त्वादिति, भवति च पादे मे सुखं शिरसि मे वेदनेत्यादिप्रतीतिः ।

"मध्यमपरिमाणः" इत्यार्हताः । तेषामयमाशयः—

आत्मा नाऽणुः नापि महत्परिमाणः, किन्तु यादृशं शरीरमधिगच्छति भवति स तादृशः । प्राप्तपिपीलिकाशरीरः स तथा भवति, अधिगम्य च हस्तिदेहं तादृग्परिमाणवान्भवतीति मध्यमपरिमाणसिद्धिः । मैवम् । तथा सत्यनित्यत्वप्रसङ्गेन कृतहानाकृताभ्यागमप्रसङ्गात् । तस्माद् विभुर्जीव इत्यन्यत्र विस्तरः ।।

१९ मनसः किं लक्षणं ? तस्य चाणुत्वे किं प्रमाणम् ।

(उ०) सुखादिसाक्षात्कारकारणत्वे सतीन्द्रियत्वं मनसो लक्षणम्, स्पर्शरहितत्वे सति क्रियावत्त्वं वा । प्रत्येकात्मनियतत्वान्मनांस्यनन्तानि । ननु मनो विभु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पर्शरहितत्वात्, आकाशवदिति चेन्न । तथात्वे ज्ञानत्वावच्छिन्नं प्रति, आत्ममनःसंयोगस्या समवायिकारणस्याभावाज्ज्ञानस्यानुत्पत्तिप्रसङ्गात् ।

न च विभुद्वयसंयोगो भवत्विति को विरोध इति वाच्यम् । तत्संयोगस्य नित्यत्वेन विभागासम्भवात् सुषुप्त्यभावः स्यात्, पुरीततिनाडीव्यतिरिक्तदेशे ह्यात्ममनःसंयोगस्य सर्वदा विद्यमानत्वात् । मन्मते तु शयनावस्थायां मनस्तस्यां नाड्यां प्रविशति तत्र स संयोगो न भवति, यदा च निस्सरति तदा भूयः संयोगसत्त्वे ज्ञानोत्पत्तिर्भवति ।

अयमभावः—अस्माकं मते जीवात्मनि ज्ञानाभावो भवति, यदा जीवो मनसा सङ्गच्छते तदैव तस्मिन् ज्ञानादिकमुत्पद्यते । एवञ्च यदि जीवोऽपि विभुः स्यान्मनोऽपि च तथा, तर्हि विभुद्वयस्य योगोऽपि नित्यं भविष्यति, तथा चाऽज्ञानरूपा सुषुप्तिरपि न स्यात् । कुतः ? ज्ञानासमवायिकारणस्य तयोः संयोगस्य विभुत्वेन सर्वदा विद्यमानत्वात् । यदि तु मनसो विभुत्वं नाङ्गीक्रियते तर्हि यदा मनः पूर्वोक्तायां नाड्यां प्रविशति तत्र तस्याणुत्वादात्मसंयोगाभावात्सुषुप्तिः, यदोपसि निस्सरति तदा भूयो ज्ञानोत्पत्तिरिति न विभु मनः, तस्याणुत्वादिति ॥

२० चित्ररूपाङ्गीकारे का वाचो युक्तिः ? ।

(प्र०) ननु चित्ररूपं कथमतिरिक्तरूपं भवति । अव्याप्यवृत्तिनीलादिकमेव कर्बुररूपमिति चेन्न ।

(उ०) रूपस्य सदा व्याप्यवृत्तित्वस्वीकारात् । ननुत थापि यैर्यैस्तन्तुभिः स पट आरभ्यते तेषामेव रूपस्य प्रतीतिरस्तु किं पटरूपाङ्गीकारेणेति चेत्, न ।

तथात्वे रूपरहितत्वेन पटस्याप्रत्यक्षत्वापत्तेः । न च स्वाश्रयसमवायसम्बन्धेन सा प्रतीतिरस्त्विति वाच्यम् । गौरवात् । स्वं तन्तुः, तस्याश्रयः पटस्तेन परम्परासम्बन्धेनेत्यर्थः । तस्माच्चित्ररूपसिद्धिरित्यन्यत्र विस्तरः ।

नव्यास्तु चित्ररूपमनतिरिक्तमेवेत्याहुः । प्रमाणन्त्वन्यत्र द्रष्टव्यम् ॥

२१ पाके नैयायिकवैशेषिकयोः कीदृशो मतभेदः ? ।

(उ०) अत्रायमभिसन्धिः—पाकस्तेजःसंयोगस्तेन पूर्वरूपादिकं नश्यति रूपान्तरादिकमुत्पद्यत इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्र परमाणुष्वेव पाको न द्व्यणुकादौ, आमपाकनिक्षिप्ते घटे आपरमाण्वन्तभङ्गे रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिरित्यर्थः ।

तत्र पाककर्मणि परमाणवः समवायिकारणं, तेजःसंयोगोऽसमवायिकारणम्, अदृष्टादिकं निमित्तकारणम् ।

तत्र चावयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति, किन्तु वह्निना आपरमाण्वन्तभङ्गे सति पुनर्द्व्यणुकादिक्रमेण तादृशद्रव्योत्पत्तिरिति वैशेषिकाः ।

अक्षपादास्तु—द्व्यणुकादावपि पाक इत्याहुः ।

तेषामयमाशयः—वह्नेः सूक्ष्मावयवा अवष्टब्धेषु चावयवेषु प्रविशन्ति सूक्ष्मत्वात् । अतो घटनाशं विनैवावयविन्यवयवेषु च युगपद्रूपान्तरोत्पत्तिः । एवञ्च सोऽयं घट इति प्रत्यभिज्ञाऽपि संगच्छेत । एकस्मिन्नन्यस्थाने दृष्टस्य पदार्थस्य भूयः कुत्रचिद्दर्शनात् यत्स्मरणं जायते तदेव प्रत्यभिज्ञा । यथा तव पुरे प्रतोल्यां भ्रमन्तं चैत्रं दृष्ट्वा मैत्रो जैत्रमाह—भोजत्र ? स्मरसि सोऽयं चैत्रो यः पुरा वाराणस्यां दृष्ट आसीदिति प्रत्यभिज्ञा ।।

२२ शब्दस्य किं लक्षणम् ? कतिविधा च तस्य वृत्तिः ?

(उ०) श्रोत्रग्राह्यो गुणः शब्दः । शब्दस्त्रिविधः । तथाहि—

१ संयोगजः, २ विभागजः, ३ शब्दजश्चेति । तत्राद्यो यथा—भेरीदण्डसंयोगे सति विलक्षणो ढमढमाशब्दः । द्वितीयो यथा—वंशदलद्वयविभागे सति चटचटाशब्दः । तृतीयो यथा—भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः ।।

२३ "नन्विदं संयोगीति प्रमायामतिव्याप्ति"रिति दीपिका । अत्र पृच्छ्यते एषातिव्याप्तिः कस्मिन्लक्षणे सङ्गच्छते । किञ्चैतस्याः परिहारः ?

इदमुत्तरम्—एषाऽतिव्याप्तिः "तदभाववति तत्प्रकारकानुभवोऽयथार्थः" इत्ययथार्थानुभवलक्षणे सङ्गच्छते यथार्थज्ञाने गतत्वात । तथाहि—

तदभाववति (मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे) तत्प्रकारकं ज्ञानं (कपिसंयोगप्रकारकं ज्ञानं (शाखावच्छेदेनेत्यर्थः) तस्य तत्र सत्त्वादतिव्याप्तिः ।

अयमभावः—"वृक्षः कपिसंयोगीति" इदं ज्ञानं सर्वैरपि यथार्थत्वेनाभ्युपगतम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परन्तु यदा तदभाववतीत्यादिलक्षणमयथार्थस्य क्रियते तदा यथार्थज्ञानानुभवेऽपि तद्वतमेव । तथा हि—

यद्यपि शाखावच्छेदेन वृक्षे कपिसंयोगो विद्यते तथापि मूलावच्छेदेन तु तदभाव एव । एवं च तदभावतीति तत्र समन्वितम् । विशेष्यदलस्य शाखावच्छेदेन संयोगसत्त्वाद्यथार्थम् । अतोऽलक्ष्ये लक्षणगमनादियमतिव्याप्तिः ।

तत्परिहारस्तु--यदवच्छेदेन (मूलावच्छेदेन वृक्षे) यत्सम्बन्धाभावः (यत्सम्बन्धेन यस्याभावः समवायसम्बन्धेन संयोगस्याभावो वृक्षे इत्यर्थः तादृशे वृक्षे) तदवच्छेदेन (मूलावच्छेदेन) तत्सम्बन्धज्ञानस्य (समवायसम्बन्धेन संयोगप्रकारकानुभवस्य) विवक्षितत्वात् ।।

वृक्षः कपिसंयोगीत्यत्र संयोगाभावावच्छेदेन (समवायेन संयोगाभाववन्मूलावच्छेदेन वृक्षे) संयोगज्ञानस्य (पूर्वोक्तसंयोगज्ञानस्येत्यर्थः) भ्रमत्वादयथार्थत्वात् ।

अयमाशयः—यदवच्छेदेन यस्य हृदये तदभावज्ञानं तिष्ठति यदि तदवच्छेदेनैव तद्वत्ताज्ञानं जायते सत्यं अत्र तु तत्तु भ्रमात्मकमेव । संयोगावच्छेदेन वृक्षः कपि संयोगीति' शाखावच्छेदेन संयोगसम्बन्धस्य (तादृशज्ञानस्य) सत्त्वान्नातिव्याप्तिरिति लक्षणसमन्वयो बोध्य इत्यलमतिविचारधारया ॥

२४ लक्षणोदाहरणपूर्वकमन्यथासिद्धिभेदा दर्शनीयाः ॥

(उ०) अथ केयमन्यथासिद्धिः ? एकस्मिन् कार्येऽनावश्यककारणानां प्रयोगोऽन्यथासिद्धिर्बोध्या । सा च त्रिविधा-तथाहि-येन सहैव यस्य यं प्रति पूर्ववर्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम् । यथा--येन तन्तुना सहैव यस्य तन्तुरूपस्य यं प्रति पटं प्रति पूर्ववृत्तित्वमवगम्यते-तं प्रति तन्तुरूपस्यान्यथासिद्धिः ।

अयम्भावः-पटं प्रति तन्तवः समवायिकारणं, तेन पटं प्रति तेषां पूर्ववृत्तित्वमावश्यकम् । परन्तु पटं प्रति तन्तुनिष्ठरूपस्य यदि—पूर्ववृत्तित्वं भविष्यति तदा तन्तुभिः साकमेव नहि स्वातन्त्र्येण । यदि तन्तुरूपस्य पटं प्रति स्वतन्त्रतया पूर्ववृत्तित्वममविष्यत्तदा कारणत्वमप्यभविष्यत । न चवं तथा, तस्मान्न तथेति व्याख्याता प्रथमान्यथासिद्धिः ।

द्वितीया च—अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तं प्रत्यन्यथासिद्धित्वम् । यथा—अन्यं प्रति शब्दं प्रति पूर्ववृत्तित्वे ज्ञात

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एव यस्य गगनस्य यं प्रति घटं प्रति पूर्ववृत्तित्वमवगम्यते तस्य गगनस्य तं प्रति घटं प्रति अन्यथासिद्धत्वम् ।

अयम्भावः—प्रत्येकपदार्थस्य भिन्नं भिन्नं कारणं भवति, यस्य च यत्कारणं तत्तस्य पूर्ववर्त्तिताकं, परमेकं कार्यं प्रति यस्य पूर्ववृत्तिता, तत्कारणस्य तथैवान्यं प्रत्यपि पूर्ववृत्तिता भवेदिति न नियमः । आकाशस्य गुणः शब्दो भवत्यतः शब्दात्पूर्वं गगनस्य पूर्ववृत्तित्वात् तस्य शब्दं प्रति गृहीतायामेव पूर्ववृत्तियां घटं प्रत्याकाशस्य पूर्ववर्तिताऽभावाद् घटं प्रत्यन्यथासिद्धत्वम् ।

यथा वा—अन्यं प्रति कुलालं प्रति कुलालपितुः पूर्ववृत्तित्वे ज्ञाते यस्य कुलालपितुर्यं घटं प्रति पूर्ववृत्तित्वमवगम्यते, स कुलालपिता घटं प्रत्यन्यथासिद्धः । इदन्तु बोध्यम्—

कुलालपितृत्वेन रूपेण कुलालपितुर्घटं प्रत्यन्यथासिद्धिः, नतु कुलालत्वेन रूपेण, कुतः ? घटं प्रति कुलालमात्रस्य कारणत्वात् ।

तृतीया च—अन्यत्र क्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धम् । इदमस्या हृदयम्—

अस्माकं नैयायिकानां नये पाकजरूपाद्युत्पत्तिस्थले गन्धप्रागभावस्य रूपप्रागभावस्य च सहैव सत्त्वेऽपि गन्धं प्रति रूपप्रागभावो न हेतुः तेन तस्यान्यथासिद्धिः ।

तथा चामपाकनिक्षिप्ते सहकारे गन्धं प्रत्यन्यत्र क्लृप्तनियतपूर्ववृत्तिना गन्धप्रागभावेनैव कार्यसम्भवे तत्सहभूतस्तेन गन्धेन सहभूतो यो रूपप्रागभावः स गन्धं प्रत्यन्यथासिद्धः ।

पञ्चविधा च साऽन्यथासिद्धिरिति केचित् । एकविधैवेत्यपरे ॥ इति दिक् ॥

२५ निर्विकल्पकं किम् ? तत्सत्त्वे किं प्रमाणम् ?

(उ०)इदमत्राकूतम्-निर्विकल्पकं सविकल्पकञ्चेति द्विविधं प्रत्यक्षमिष्यते । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । विशेषणविशेष्यसम्बन्धानवगाहिज्ञानमित्यर्थः । यथा-इदं किञ्चित् ।

(प्र०) ननु निर्विकल्पकसत्त्वे किं प्रमाणमिति चेन्न ।

(उ०) "गौरि"ति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वाद् दण्डीति ज्ञानवत्" इत्यनुमानस्यैव तत्र प्रमाणत्वात् । विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसङ्गान्निर्विकल्पकसिद्धिरित्यन्यत्र विस्तरः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२६ अनुपलब्धेः प्रमाणान्तरत्वं निरसनीयम् ॥

(प्र०) अयमन्नाभिसन्धिः-"भूतलं घटाभाववदिति"ज्ञानाय केचन सौगतादयोऽनुपलब्धेरपि प्रामाण्यमभ्युपगच्छन्ति ।

(उ०) तन्न । भूतलं दृष्ट्वा यद्यत्र घटोऽभविष्यत्तदाभूतलमवाद्राक्ष्यद्-दर्शनाभावान्नास्तीतितर्कितप्रतियोगिसत्त्वविरोधानुपलब्धेः सहकृतेनेन्द्रियेणैवाभावज्ञानोत्पत्तौ तस्याः प्रमाणान्तरत्वस्यागतत्वात् । अयमभावः—"येनेन्द्रियेण यद् गृह्यते तेनैव तन्निष्ठा जातिस्तदभावश्च गृह्यत" इतिन्यायेनैव तत्र सम्यग् निर्वाहे ह्यधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव कारणत्वापपत्तावनुपलब्धेः प्रमाणान्तरत्वस्यायुक्तत्वादिति ॥

इति तर्कमकरन्दे प्रथमचषकः ।



अथ तर्कमकरन्दे द्वितीयचषकः ।

अन्धान्तकाय त्रिपुरान्तकाय, भवान्तकाय प्रभयान्तकाय ।
अन्तान्तकायाशरप्रान्तकाय, कामान्तकाय प्रनुतिर्भवाय ॥ १ ॥

१ परामर्शस्य विशिष्य व्यापारत्वं प्रतिपादनीयम् ॥ १ ॥

अस्योत्तरम्—अनुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारः, अनुमितिः फलम् । ननु व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वं तच्च परामर्शे न सम्भवतीति चेन्न । परामर्शस्य व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यानुमितेर्जनकत्वमस्त्येव । यथा दण्डजन्यत्वे सति भ्रमिरूपव्यापारस्य तज्जन्यस्य दण्डजन्यस्य घटस्य जनकत्वमस्ति, एवमेव प्रकृतेऽपि पूर्वोक्तप्रणाल्या परामर्शस्य व्यापारत्वं सिद्धमेवेति न व्यभिचार इत्यर्थः ॥

२ "परामर्शजन्यं ज्ञान मनुमितिरि"ति मूलम् ।

(प्र०) नन्विदं लक्षणं संशयोत्तरप्रत्यक्षेऽतिव्याप्तं तत्कथं निर्दुष्टमिति । नच तत्रानुमितिरेवेति वाच्यम् । पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधा चेन्न ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(उ०) पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वादिति । एतच्चाग्रे स्फुटीभविष्यति ।।

३ का नाम पक्षता ? का वा तत्र विशेषणयोर्व्यावृत्तिः ! साध्यसंशयस्य पक्षतात्वे को दोषः ? उत्तेजकत्वं किम् ? प्रतिबन्धकत्वं च किम् ? ।

(उ०) अत्रेदमाकूतम्--सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । पर्वते साध्यसिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव, अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् । सिषाधयिषामात्रं न पक्षता, विनापि सिषाधयिषां घनगर्जितादिना मेघानुमानात् ।

तथा च गृहमध्यस्थपुरुषस्य "गगने मेघमनुमिया"मिति सिषाधयिषाया अभावेऽपि घनगर्जितमाकर्ण्य "गगनं मेघवद् घनगर्जितवत्त्वात्, यन्नैवं तन्नैवं यथा मेघशून्यगगनमि"त्यनुमितिर्भवत्येव, अतो विशेष्योपादानम् । अतएव साध्यसंशयोऽपि न पक्षता ! विनापि साध्यसंदेहं पूर्वोक्तरीत्या साध्यानुमानात् ।

उत्तेजकत्वञ्च—प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वं बोध्यम् । यथा—अनुमितौ सिषाधयिषाविरहविशिष्टसिद्धिः प्रतिबन्धिका, तन्निष्ठप्रतिबन्धकतावच्छेदकीभूतो विशेषणीभूतो योऽभावः—सिषाधयिषाऽभावः, तत्प्रतियोगित्वञ्च सिषाधयिषायाम्, अतः प्रकृते सिषाधयिषोत्तेजिका ।

कार्यानुकूलव्यापारोपष्टम्भकत्वं प्रतिबन्धकत्वम्, यथा प्रकृते कार्यानुकूलव्यापारः कः ? अनुमितिरूपः । तस्योपष्टम्भकं किं ? सिद्धिसत्त्वम् ।

अतोऽनुमितौ सिद्धिसहकृतज्ञानं प्रतिबन्धकं ज्ञेयमित्यास्तां विस्तरः ॥

४ "साहचर्यनियमः" इति कस्य लक्षणम् ? किञ्च साहचर्यनियमे प्रमाणम् ? इति सुस्पष्टं निरूप्यताम् ।

(उ०) साहचर्यनियम इति व्याप्तेर्लक्षणम् । तथा च—

हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तेर्लक्षणम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"भूयो दर्शनेने"ति मूलम् । अत्रायं पूर्वपक्षः—

ननु पार्थिवलौहलेख्यत्वयोः शतशः सहचारदर्शनेऽपि मण्यादौ व्यभिचारोपलब्धेर्भूयः सहचारदर्शनेन व्याप्तिग्रह इति कथं संगच्छते ?

उत्तरम्—व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वादिति ।

तथाच पूर्वोक्तं ज्ञानं व्यभिचारसहकृतमतो न व्यभिचारः ॥

५ व्यभिचारज्ञानं कतिविधं ? तद्विरहो भवति न वा ? भवति चेत्कथं ? एकस्मिन्पदार्थे व्याप्तिग्रहेऽपि कथमन्यत्र व्याप्तिग्रहः ?

अत्रेदमुत्तरम्—व्यभिचारज्ञानं द्विविधं भवति—निश्चयः शङ्का चेति । तत्र व्यभिचारशङ्कावारणं क्वचित्तर्कात् । यथा—पर्वते धूमोऽस्तु वह्निर्मास्त्विति शंकायां धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादिति । एवं यदि कारणकार्ययोर्व्यभिचारशंका स्यात्तदा साऽपि कार्यकारणभावतर्कादपैति । यथा—

यदि कारणं विना कार्यं भविष्यति तदाऽहेतुकमेव भविष्यतीति तथा च विनापि भोजनं तृप्तिः स्यादिति । अत एवोक्तं तत्रभवता विश्वनाथेन—

"तर्कः क्वचिच्छङ्कानिवर्तक" इति। यत्र न व्यभिचारशङ्का तत्र च न तर्कापेक्षेति ।

ननु महानसीयधूमं महानसीयवह्निसहकृतं दृष्ट्वा तेन साहचर्येण तत्र व्याप्तिग्रहेऽपि कथमन्यत्र व्याप्तिग्रह इति चेन्न । वह्नित्वधूमत्वसामान्यप्रत्यासत्त्या सकलवह्निधूमज्ञानसम्भवादिति हृदयम् ॥

६ (क) परामर्शसत्त्वे किं प्रमाणम् ? (ख) ज्ञायमानलिङ्गस्यानुमितौ कारणत्वे को दोषः ? कथञ्च तत्परिहारः ?

(प्र०) (क) इदमवधेयम्—नैयायिकानां नये अनुमितौ प्रथमं "पर्वतो वह्निमानि"ति प्रत्यक्षम् । ततः साहचर्यरूपव्याप्तिस्मरणम् । ततो "वह्निव्याप्यधूमवानय"मिति परामर्शः, ततः "पर्वतो वह्निमानि"त्यनुमितिः इत्येषा प्रक्रिया भवति ।

परं मीमांसकास्तु—प्रथमं धूमवानिति प्रत्यक्षम् । ततो व्याप्तिस्मरणम् । ततः पर्वतो धूमवानित्यनुमितिः, अर्थाद् विशिष्टवैशिष्ट्यात्मकपरामर्शज्ञानं व्यर्थमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वदन्ति । तेषामयमाशयः—व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसम्भवे विशिष्टवैशिष्ट्यात्मकः परामर्शो व्यर्थ इति ।।

(उ०) एवं चैतन्मनोरमम्—"वह्निव्याप्यधूमवानि"ति—शाब्दपरामर्शस्थले स्वव्यापि परामर्शस्य कारणतया अवश्यमभ्युपेयत्वाल्लाघवेन सर्वत्रैव तस्य कारणत्वमस्तु । नच गौरवापत्तिरिति वाच्यम् । फलमुखगौरवस्यादोषत्वादिति दिक् ॥

(प्र०) (ख) विरन्तना व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमिति प्रति कारणमिति वदन्ति ।

(उ०) किन्तु तत्र चारुतरम् । यदि ज्ञायमानं लिङ्गमनुमितौ कारणं भविष्यति तदा "इयं यज्ञशाला वह्निमत्यासीत् अतीतधूमवत्त्वात्" एवं "इयं यज्ञशाला वह्निमतो भविष्यति भाविधूमवत्त्वा"दित्येवमनागतादिलिङ्गेनानुमितिर्न स्यादिति । मन्मते तु लिङ्गज्ञानमेव कारणम् । अतस्तत्रापि लिङ्गज्ञानमस्त्येवेति न व्यभिचार इत्यन्यत्र विस्तरः ।।

७ "सन्दिग्धसाध्यवान्पक्षः" इति मूलम् ।

(प्र०) अत्र श्रवणानन्तरभाविमननस्थले वेदवाक्यैरात्मनो निश्चयसत्त्वेन सन्देहाभावादात्मानुमानेऽव्याप्तिप्रसक्तत्वात्, प्रत्यक्षेऽपि वह्नाविच्छयाऽनुमितिसम्भवात्तत्राप्यव्याप्तिदोषो निरसनीयः ।

(उ०) अयम्भावः—"सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता" इति पक्षतालक्षणसत्त्वान्न दोषः । तथा च—महानसे वह्निमनुमिनुयामित्याकारकसिषाधयिषाविरहविशिष्टा या (देशान्तरीयकालान्तरीया) सिद्धिस्तदभावस्य तत्र सत्त्वात पक्षतासत्त्वेऽनुमितिर्भवतीति ।

एवं क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वादित्यत्रापि सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तेनानुमितिर्भवतीति ।

अयमाशयः—यत्र "द्यावाभूमी जनयन्देव एकः" इत्यादिवेदवाक्यैरेव विगतसन्देहोऽपि मानवः स्वयमेवानुमिनुयामितोच्छयानुमिनोति "क्षित्यादिकं सकर्तृकमिति" । किंच प्रत्यक्षेणापि सिद्धार्थे तर्कव्यसनिनस्तत्राप्यनुमानं स्वीकुर्वन्ति, तदुभयमप्यनुपपन्नं स्यात्-तत्र सन्दिग्धसाध्याभावादिति । अतएवोक्तमुदयनाचार्यैः-"प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका" इति ।

तथा च—तत्र सिषाधयिषोत्तेजका वर्ततेऽतः सन्देहाभावदशायामप्यनुमितिर्भवत्येवेति भावः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८ पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्रभट्टेन केवलव्यतिरेकिण उदाहरणं दत्तम् । तत्रेतरभेदस्य घटादौ प्रसिद्धौ तत्र हेतुसत्त्वेऽन्वयित्वमसत्त्वेऽसाधारण्यमप्रसिद्धौ च साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिरिति ?

(उ०) अत्रेदं समाधानम्–पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्र जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां कूटः पृथिव्यां साध्यते, तत्र च त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिकरणवृत्तित्वाभावान्न पूर्वोक्तमन्वयित्वमसाधारण्यं वा, प्रत्येकाधिकरणन्तु जलादि प्रसिद्धमेवेति कथं न साध्यविशिष्टानुमितिः, कथं वा न प्रतियोगिज्ञानसत्त्वेन साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तिज्ञाननिरूपणमिति ॥

९ विरुद्धसत्प्रतिपक्षयोः को विशेषः ?

अत्योत्तरम्—विरुद्धहेत्वाभासस्तु साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः । अर्थात्तस्य तु हेतुरेवानुमितेः प्रतिबन्धकः । यथा शब्दो नित्यः कृतकत्वादिति । अत्र कृतकत्वं न युक्तो हेतुः, तस्यानित्यत्वसाधकत्वादिति । सत्प्रतिपक्षे तु प्रतिहेतुः–(द्वितीयहेतुः) एवानुमितेः प्रतिबन्धक इति विशेषः । यथा—

"शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्, शब्दोऽनित्यः कार्यत्वात् घटवदिति" ॥

१० उपाधेः किं लक्षणं ? कुत्रापि लक्षणसमन्वयः कार्यः, तद्भेदाश्च सोदाहरणाः प्रदर्शनीयाः ॥

इदं बोध्यम्—"साध्यव्यापकत्वे सति साधनाव्यापकत्व"मुपाधिः । व्यभिचारज्ञानाद्युन्नायकतयैतस्य व्याप्तिज्ञानप्रतिबन्धः फलम् । यथा—"पर्वतो धूमवान् वह्नेः" इत्यत्रार्द्रेन्धनसंयोग उपाधिः । तथाहि—यत्र यत्र धूमस्तत्र तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति' अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वाल्लक्षणसमन्वयः ।

अयञ्चोपाधिश्चतुर्विधः—१ केवलसाध्यव्यापकः २ पक्षधर्मावच्छिन्न-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साध्यव्यापकः ३ साधनावच्छिन्नसाध्यव्यापकः ४ उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति।

तत्राद्यो यथा—"धूमवान् वन्हेः" इत्यत्रार्द्रेन्धनसंयोग उपाधिः ।

द्वितीयो यथा—"वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वा"दित्यत्रोद्भूतरूपवत्त्वमुपाधिः । तथाच यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति घटादौ प्रत्यक्षाधिकरणे साध्यव्यापकत्वम् । यत्र यत्र स्पर्शाश्रयत्वं तत्र तत्रोद्भूतरूपवत्त्वं नास्तीति पक्षे वायौ साधनाव्यापकत्वम् ॥

तृतीयो यथा— विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वमुपाधिः । यत्र यत्र जन्यत्वे सति विनाशित्वं तत्र तत्र भावत्वमिति घटादौ साध्यव्यापकत्वम् । यत्र यत्र जन्यत्वं तत्र तत्र न भावत्वमिति पक्षे साधनाऽव्यापकत्वम् ।

तुरीयस्तु—यथा—"प्रागभावो विनाशी प्रमेयत्वादि"त्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वमिति बोध्यमिति दिक् ।।

इति तर्कमकरन्दे द्वितीयचषकः ॥

अथ तर्कमकरन्दे तृतीयचषकः

वन्दे गणपतिचरणं, भवभयहरणं दलितदीनशरणम् ।
विपुलभवाम्बुधितरणं, विहितकरुणञ्चाश्रितशरणम् ।। १ ।।
व्रजन्मरुत्प्रोषसि मन्दमन्दम् , प्रोद्भिन्नकोरंग्यरविन्दवृन्दम् ।
उन्मत्तकीरालिपिकालिभृङ्गा, वन्दे सदा यत्य कुशीलवास्तम् ।। २ ।।

१ स्वमतस्थापनपुरस्सरं जातिशक्तिवादिमतं निरसनीयम्।

(प्र०) अयमत्राभिसन्धिः—मीमांसका हि घटगोपदादीनां जातावेव शक्तिं मन्यन्ते । तेषामयमाशयः—

नैयायिका अपि जातिविशिष्टव्यक्तावेव शक्तिमभ्युपगच्छन्ति, नहि केवलव्यक्तौ । तत्रापि "नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छती"ति न्यायेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रथमोपस्थितस्य गोपदे गोत्वस्यैव शक्यत्वमस्तु किमिति व्यक्तिशक्त्या । न चैवं व्यक्तिबोधो न स्यादिति वाच्यम् । व्यक्तिलाभस्त्वाक्षेपात ।

अर्थात—अर्थापत्त्या व्यक्तेर्ग्रहणमिति भावः ।

(उ०) तन्न । 'गामानय' 'गां बधान' 'गौः सूते' 'गौर्वर्धते' इति सर्वत्र वृद्धव्यवहारेण व्यक्तावेव शक्तिग्रहादिति ।

किञ्च गोत्वं यदि शक्यं तर्हि गोत्वत्वं शक्यतावच्छेदकं वाच्यम् । गोत्वत्वं च गवेतराऽसमवेतत्वे सति सकलगोसमवेतत्वम् । एवं च तन्नानन्तगोव्यक्तीनां समावेशात्तवैव गौरवम् । अतः "गामानय" इत्यत्र गोपदस्य गोत्वावच्छिन्ने गवि, "अश्वं बधान" इत्यत्राश्वपदस्य चाश्वत्वावच्छिन्नाश्वे वृद्धव्यवहारेण शक्तिं गृह्णाति पार्श्वस्थो बालः ।

वृद्धव्यवहारेण शक्तिग्रहप्रकारस्तु—

पार्श्वस्थः शक्तिग्राहिलाषी बालो "घटेन जलमानये"ति प्रयोजकवृद्धवाक्यश्रवणानन्तरं तत्र मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य जलानयनं विलोक्य मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य "अश्वमानय" "गामानये"ति वाक्यान्तरे चावापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः, अश्वपदस्य चाश्वत्वविशिष्टे शक्तिरिति व्युत्पद्यते ॥

२ लक्षणाया बीजप्रतिपादनपुरस्सरं सोदाहरणं तस्या भेदान् प्रतिपाद्य व्यञ्जनाया अनतिरिक्तत्वं प्रतिपादनीयम् ।

(उ०)इदमत्रावधेयम्–अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा लक्षणाया बीजम् ।तत्र शक्यसम्बन्धो लक्षणा । लक्ष्यतेऽनयेति लक्षणा । सा च त्रिविधा—१ जहल्लक्षणा २ अजहल्लक्षा ३ जहदजहल्लक्षणा चेति । तत्राद्या यथा–मञ्चाः क्रोशन्ति, श्वेतो धावति, इत्यादौ मञ्चपदस्य मञ्चस्थपुरुषे, श्वेतो धावतीत्यस्य श्वेतरूपविशिष्टेऽश्वे लक्षणेति । अक्षरार्थस्तु–जहाति त्यजति स्वस्य अर्थमिति जहत्स्वार्था । द्वितीया तु "काकेभ्यो दधि रक्ष्यता"मित्यादौ काकपदस्य दध्युपघातके लक्षणा । तेन च सर्वेषां कुक्कुरसारमेयकाकबिडालादीनां दध्युपघातकत्वेन रूपेण काकपदेन ग्रहणम् । अस्या अर्थस्तु—न जहाति स्वस्य अर्थमित्यजहत्स्वार्था । अन्त्या यथा—जीवब्रह्मणोरैक्यं ब्रुवतां वेदान्तिनां मतेन "तत्त्वमसि" इत्युदाहरणम् । नैयायिका-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नां नयेन तु "सोऽयं मैत्रः" इति । वस्तुतस्तु तृतीया लक्षणाऽनतिरिक्तैव, अत एव नेयं प्रायशो बहुभिरङ्गीकृतेति ।

आलङ्कारिकाः शब्दशक्तिमूलां अर्थशक्तिमूलाञ्च व्यञ्जनामप्यतिरिक्तां मन्यन्ते। तेषामयमाशयः—

"गङ्गायां घोषः" इत्यादौ गङ्गापदं शक्त्या प्रवाहरूपमर्थं द्योतयति, परं "घोष आभीरपल्ली स्यादि"त्यनुशासनादाभीरपल्याः प्रवाहेऽसम्भवात् लक्षणया तीरस्योपस्थितिरावश्यकीया । परं यन्निमित्तं सा लक्षणा (शैत्यपावनत्वादिबोधनाय) क्रियते व्यञ्जनां विना तस्यानुपपत्तिः । अतः साऽङ्गीकार्येति । परमयं सर्वथा अप्रस्तुत एव ।

शब्दशक्तिमूलायाः शक्तिलक्षणान्तर्गतत्वात् । अर्थशक्तिमूलायाश्चानुमानादिना बोधात् ।

तत्र यथा—जहल्लक्षणया—गङ्गायां घोष इत्यादौ तीरस्य बोधस्तथैव शैत्यपावनत्वादीनामपि बोधः स्यादिति ।

अर्थशक्तिमूला च "गच्छ गच्छसि चेत्कान्त ! पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानि"त्यत्र मम गमनानन्तरमियं प्राणांस्त्यक्ष्यतीति शाब्दबोधं बोधयितुं युष्माभिरङ्गीक्रियते । सत्यम्, परमनुमानेनैवात्र निर्बाहात्सा नाद्रियते दार्शनिकैः । अनुमानप्रयोगस्तु—

"इयं प्रियतमा मयि गते दुःखात्प्राणवियोगवती विलक्षणशब्दप्रयोगात्, यन्नैवं तन्नैवं यथा—"गच्छ गच्छसि चेन्कान्त! पन्थानः—सन्तु ते शिवाः । सर्वा भद्राणि कुर्वन्तु, प्रिय ते कुलदेवताः" इति शब्दप्रयोगवती कामिनी इत्यास्तां विस्तरः ।।

३ पिधेहीत्यादिवाक्ये द्वारपदार्थाध्याहारं विनैव निर्वाहे किमर्थः शब्दाध्याहारः ? इति व्युत्पादनीयम् ।।

(प्र०) अत्र मीमांसकाः—पिधेहीति पदे उच्चारिते सति द्वारमित्यर्थस्याध्याहारो न तु द्वारमिति शब्दस्यैवमाहुः ।

तेषामयमाशयः—अर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासम्भवादर्थाध्याहार एव युक्तः प्रथमोपस्थितत्वादिति ।

(उ०) तन्न । पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वात् । "द्वारप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दोत्तरद्वितीयाविभक्तिरेव कर्मत्वबोधिका । अत एव च घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः । त्वन्मते च स्यात् ।

किञ्च–"पुरुषेभ्यः" इत्यत्र स्पृहयतीत्यस्याप्रयोगे चतुर्थ्यनुपपत्तेः । कुतः ? तव मते स्पृहयतीति क्रियाया अर्थस्याध्याहारो न तु स्पृहयतिशब्दस्य । व्याकरणसूत्रे च स्पृहेर्योग एव चतुर्थीविभक्तेरनुशासनात् । मन्मते तु न व्यभिचारलेशोपीत्यन्यत्र विस्तरः ।।

४ वाक्यार्थज्ञाने कस्य हेतुत्वम् ?

(उ०) (१) आकांक्षा(२)योग्यता(३)सन्निधिश्च–वाक्यार्थज्ञाने हेतुः । तत्राद्या यथा—

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाऽननुभावकत्वरूपा पदगता । तथाच गौः, अश्वः, हस्ती, पुरुषः, इत्यादिकमाकांक्षाविरहान्न वाक्यार्थज्ञाने हेतुः । द्वितीया च–अबाधरूपा । यथा—"वह्निना सिञ्चति" इति न प्रमाणं योग्यताविरहादिति । तृतीया च—पदानामविलम्बेनोच्चारणरूपा । गामिति दशवादनकाले कथयित्वा भूयोऽपि द्वादशवादने कथयति—"आनय" इति । तन्न प्रमाणम् । सान्निध्याभावादिति मुक्तावल्यादौ व्यासः ।।

५ शब्दानित्यत्वप्रतिपादनपुरःसरं वेदानामनित्यत्वं प्रतिपादनीयम्। "अनित्यत्वान्न तेषां प्रामाण्य"मिति पूर्वपक्षोऽपि निरसनीयः।

(प्र०) ननु मूले–"वाक्यं द्विविधं। वैदिकं लौकिकञ्च। लौकिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणमि"त्युक्तम्। परं नैतत्सम्भवति । वेदानामनादित्वात्कथं तेषामीश्वरोक्तत्वं सम्भाव्यते इति ।

(उ०) मैवम् । "वेदाः पौरुषेया वाक्यसमूहत्वाद् भारतादिवत्" इत्यनुमानेन तेषां पौरुषेयत्वसिद्धेः । अन्यच्च तादृशज्ञानाद्युत्पादनाय न जीवेषु तादृशी शक्तिस्तेन न गौतमकणादकपिलादीनामपि कर्तृत्वं वेदस्य । न चाधुनिकग्रन्थेषु कर्तॄणां नामान्युपलभ्यन्ते न च वेदे, तेन न कर्ता तेषामिति वाच्यम् । वेदेऽपि–"छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत" "तस्मात्तपस्तेपानात् त्रयो वेदा अजायन्त" इति निर्देशात् । ननु "सोऽयं गकारः" इति प्रतीते-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्तु शब्दानां नित्यत्वं प्रतीयते, तथा च कथं वेदानामनित्यत्वमिति चेन्न । सेयं दीपकलिकेतिवत् तस्याः साजात्यालम्बनत्वात् । तस्माद् वर्णानामनित्यत्वादनित्यो वेदः । न च तेषामनित्यत्वादप्रामाण्यापत्तिरिति वाच्यम् । नित्यज्ञानाश्रयचेतनशुद्धबुद्धभगवतो वचनादिति । शब्दानित्यत्वप्रकरणन्तु महार्णवे लिखितं वर्तते तत्रैव व्यासेच्छुभिः कृपया दृक्पातः कार्य इत्यलमतिपल्लवितेन ।।

६ शब्दोपमानयोरनतिरिक्तत्वप्रतिपादनपुरस्सरं तत्खण्डनं कृत्वा अर्थापत्तिसम्भवचेष्टानुपलब्धीनां प्रमाणान्तरत्वं निरसनीयम् ।

(प्र०) अयमत्राभिसन्धिः—"शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते । अनुमानगतार्थत्वादि"ति वैशेषिका वदन्ति । तेषामयमाशयः—"एतानि पदानि स्मारितार्थसंसर्गप्रमापूर्वकाण्याकांक्षादिमत्पदकदम्बत्वात्, गामानय दण्डेनेति मद्वाक्यवदित्यनुमानेनैव ज्ञानसम्भवाच्छब्दो न प्रमाणमिति ।

(उ०) तन्न । अ मित्यपेक्षया शब्दस्य विलक्षणत्वादिति । अनुमानस्य च व्याप्तिपूर्वकत्वात्, शब्दप्रमाणस्य च तन्निरपेक्षत्वात् । अत उक्तं विश्वनाथेन "तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधत" इति । किञ्च शब्दात्प्रत्येमि नत्वनुमिनोमीति प्रतीतिविषयत्वाच्च । एवमेवोपमानादुपमिनोमि नत्वनुमिनोमीति प्रतीतिपार्थक्यान्न नोपमानं मानान्तरमिति ।

(प्र०) अर्थापत्तेरपि मीमांसकाः प्रामाण्यमभ्युपगच्छन्ति । तेषामयमाशयः—"पीनो देवदत्तो दिवा न भुङ्क्ते" इति दृष्टे श्रुते वा भोजनं विना पीनत्वमनुपपन्नमतोऽर्थापत्त्या रात्रिभोजनं ज्ञायतेऽयमर्थापत्तेर्विषयः ।

अन्यच्च यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं, कस्मिंश्च देवदत्तं गृहे न पश्यति तदार्थापत्त्या वेत्ति यद् देवदत्तो बहिर्गत इति । अतोऽर्थापत्तेरपि प्रामाण्यमङ्गीकार्यम् ।

उ० सा चानुमानगतार्थत्वान्नेष्यते । तथाहि—

"देवदत्तो रात्रिभोजी दिवाऽभुञ्जानत्वे सति पीनत्वात्, यत्र यत्र दिवाऽभुञ्जानत्वे सति पीनत्वं तत्र तत्र रात्रिभोजनकर्तृत्वं यथा मैत्रे ।

"देवदत्तो बहिस्तिष्ठति गृहेऽसत्त्वात् । यत्र यत्र जीवित्वे सति गृहेऽसत्त्वं तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वहिःसत्त्वं यथा महमि"तिव्यतिरेक्यनुमानेनैव निर्वाहादिति । अत एवोक्तं तत्र-भवद्भिः मुक्तावलीकारैः—"व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः इति ।

सम्भवमपि केचित्प्रमाणं सम्भावयन्ति । तेऽप्येवमाहुः—"सम्भवति सहस्रे शतं" "सम्भवति ब्राह्मणे विद्या" इत्यादिकं सम्भवस्य विषयः । तदपि न प्रामाण्यकोटिमाटीकते—व्याप्तिज्ञानसापेक्षत्वेन अनुमानेनैव निर्वाहादिति ।

चेष्टापि प्रमाणान्तरमित्याहुश्चारिकाः । तदपि न । शब्देऽनुमाने वा तस्या अन्तर्भावादिति ।

अनुपलब्धेः प्रमाणान्तरत्वं प्रथमचषके निरस्तमेव । तस्मात्—

प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि । यदुक्तं तत्र सकलवृन्दारकमुनि-मनुजवन्दनीयेन भगवताऽक्षपादेन शास्त्रस्य तृतीयसूत्रे। "प्रत्यक्षानुमानोपमान-शब्दाः प्रमाणानी"ति ।।

७ प्रामाण्यज्ञानं स्वतः परतो वेति प्रतिपादनीयम् ।

(प्र०)—ज्ञानप्रामाण्यं स्वतः परतो वेति विचार्यते । तत्र स्वत एव प्रामाण्यं गृह्यते, "घटमहं जावामी"त्यनुव्यवसायेन घटघटत्वयोरिव तत्सम्बन्धस्यापि विषयीकरणाद् व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् । पुरोवर्तिनि प्रकारसम्बन्ध-स्यैव प्रमात्वपदार्थत्वादिति मीमांसकाः ।

तत्रापि कुमारिलभट्टानां मते—ज्ञानमतीन्द्रियं तज्जन्या ज्ञातता! प्रत्यक्षा तया च ज्ञानमनुमीयते । गुरूणां मते ज्ञानस्य स्वप्रकाशकत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यत इति ।

मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते । पूर्वं सर्वेषामपि मते विषय-निरूप्यं हि ज्ञानं, अतो ज्ञानविज्ञेवेद्यो विषय इति ।

(उ०) तत्र । यदि प्रामाण्यं स्वतो ग्राह्यं स्यात् तदाऽनभ्यासदशोत्पन्ने ज्ञाने प्रामाण्यसंशयो न स्यात् । तत्र हि ज्ञानं यदि ज्ञातं तदापि त्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः ? यदि न च ज्ञातं तदापि धर्मिज्ञानं विना कथं संशयः ? तस्मात्प्रामाण्यं परतो ग्राह्यं वाच्यम् । तथात्वे तु—प्रथमं जलज्ञानान्तरं प्रवृत्तौ सत्यां जललाभे सति "पूर्वोक्तं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्—यन्नैवं तन्नैवं यथा-ऽप्रमेति परतः प्रमात्वनिश्चयः। अयमाशयः—यदा तु प्रामाण्यं स्वतो ग्राह्यं तदा त्वनभ्यासदशायामुत्पन्ने ज्ञाने संशयो न स्यात् । कुतः ? एको जलार्थी विपिने

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समन्ताद् भ्रमति परं जलं न लभते, त्वन्मते यावदसौ कासारजलं नाधिगच्छति तावदिदं जलज्ञानं प्रमाऽप्रमा वेति संशयात्मकं ज्ञानं न सम्भाव्यते। कुतः ? धर्मिणं ज्ञात्वैव संशयो भवति नाऽन्यथा । यदा तु जलज्ञानं ज्ञातं तदापि संशयो न स्यात । कुतः ? प्रामाण्यं ज्ञातमेवेति कथं संशयः ? मन्मते तु कासारं दृष्ट्वाऽसौ कथयति—

यन्मया पूर्वं ज्ञातमासीद्यदत्र जलं भविष्यति तज्ज्ञानं प्रमा, कुतोऽत्र जलसंप्राप्तेः" इति संशयोत्तरमेव प्रामाण्यं गृहीतम् । तस्माज्ज्ञानं न स्वतो ग्राह्यं परतो ग्राह्यत्वात् । अत एवोक्तं तन्नभवता विश्वनाथेन—

"प्रामाण्यं न स्वतो ग्राह्यं संशयानुपपत्तितः" इति ।।

८ सर्वेषामेव ज्ञानानां यथार्थत्वादयथार्थज्ञानमेव नास्तीति मतं निराक्रियताम् ।

(प्र०) अयमत्राभिसन्धिः—नैयायिकानां नये ज्ञानं द्विविधं भवति यथार्थाऽयथार्थभेदात । शंखः पीतः, वंश डरगः, स्तम्भः पुरुषः, इत्याद्ययथार्थज्ञानानां पीतमण्डूकवसांजनादिदोषादुत्पत्तिरिति मन्यन्ते । तत्र च मीमांसकः शङ्कते—ननु सर्वेषामेव ज्ञानानां यथार्थत्वात् पीतमण्डूकवसाञ्जनादिदोषाणां कल्पनं व्यर्थम् । न चैवं "शुक्ताविदं रजतमि"ति भ्रमात्मकं ज्ञानं न स्यात, तव मते दोषाणामनवकाशादिति वाच्यम् । रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव तत्सम्भवात् । उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन "नेदं रजतम्" इत्यादावतिप्रसङ्गाभावादिति चेन्न ।

(उ०) सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनादिति दिक् ॥

इति तर्कमकरन्दे तृतीयचषकः ॥

अथ तुरीयचषकः

समाधगम्य यत्करुणालवं, तरति नरो भवसागरम् ।
यदीयकरुणां विना, भ्रमति जन्मचक्रे मुहुः ॥ १ ॥
तदीयचरणाविन्दवृन्दमकरन्दसन्दोहस्यन्दनम् ।
आस्वादयन् रम तु रे मनः ? भृङ्गायमाणं मम ॥ २ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१ समवायसिद्धिप्रकारः प्रदर्शनीयः, किञ्च तल्लक्षणं ? किञ्चायुतसिद्धत्वम् ?

अस्योत्तरम्—नित्यसम्बन्धत्वं समवायत्वम् । सम्बन्धत्वं विशिष्टबुद्धिनियामकत्वम् । सम्बन्धमात्रापादाने 'योगेऽतिव्याप्तिः—अत उक्तं नित्येति । तावन्मात्रोपादाने कालादावतिप्रसङ्ग अत उक्तं सम्बन्ध इति ।

ननु समवायसत्त्वे किं मानमिति चेन्न । "नीलो घटः" इति विशिष्टप्रतीतिः विशेषणविशेष्यसम्बन्धविषया विशिष्टप्रत्ययत्वात्-"दण्डी पुरुष" इति विशिष्टप्रतीतिवदिति समवायसिद्धेः । (मुक्तावलीकारर्यद्यप्यत्र बहु लिखितं तथाप्यत्र विस्तरभयान्न लिख्यते) ।

"ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ" ।।

"अवयवावयविनोः" क्रियाक्रियावतोः" "जातिव्यक्त्योः" "गुणगुणिनोः" नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायो बोध्य इत्यलम् ॥

२ अभावः कतिविधः, किञ्च तेषां स्वरूपम्, विशिष्टाभावादिरतिरिक्तो न वा ? अभावस्याधिकरणस्वरूपत्वं नवेति च प्रतिपादनीयम् ।

(उ०) अभावश्चतुर्विधः—प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति । अनादिः सान्तः प्रागभावः, सादिरनन्तो ध्वंसः, त्रैकालिकः संसर्गाभावोऽत्यन्ताभावः, तादात्म्यावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः ।

केवलदेवदत्तवति दण्डी नास्तीति प्रत्ययात् केवलदेवदत्ताभावादण्डविशिष्टतदभावो,एकसत्त्वेऽपि द्वौ न स्त इति प्रतीत्या द्वित्वाद्यवच्छिन्नाभावः, संयोगेन घटवति समवायेन घटाभावः, तत्तद्घटाभावाद्घटत्वावच्छिन्नप्रतियोगिताकसामान्याभावश्चातिरिक्त एव ।

(प्र०) ननु केवलाधिकरणेनैव नास्तीति व्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति मीमांसकाः ।

(उ०) तन्न, अभावानङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात् इति ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३ शक्तिस्वत्त्वयोः पदार्थान्तरत्वं निरस्यताम् ।

(प्र०) अत्रेदमाकूतम्—मूले "द्रव्यगुणे"त्यादयः सप्त पदार्था उक्ताः । तदयुक्तम्, शक्तिस्वत्त्वयोरपि पदार्थान्तरत्वात् । न च शक्तिसत्वे किं प्रमाणमिति वाच्यम् । मण्यादिसमवधाने वह्निना दाहवारणाय मण्यादेः कार्यानुकूलकारणताविघटकत्वरूपप्रतिबन्धकत्वं वाच्यम् । तच्च वह्निनिष्ठदाहानुकूलशक्तिनिष्ठकारणताविघटकत्वेनैव सिद्धयतीति शक्तिसिद्धिः ।

(उ०) तन्न, प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात्, कारणत्वस्यैव शक्तिपदार्थत्वात् । किञ्च शक्तेरतिरिक्तस्वेऽनन्तशक्तितत्प्रागभावतदूध्वंसकल्पनानौचित्यात्तवैव गौरवम् । न चोत्तेजके सति प्रतिबन्धकसत्त्वेऽपि कथं दाह इति वाच्यम् । उत्तेजकाभावविशिष्टमण्यभावस्यव कारणत्वात् । तस्माच्छक्तिर्नातिरिक्तः पदार्थः ।

(प्र०) प्राचीनाः स्वत्त्वमपि पदार्थान्तरं मन्यन्ते । तेषामयमाशयः—"इदं धनं मैत्रस्य" इत्यत्र यत् मैत्रस्य स्वत्त्वं प्रतीयते, तद्धि पदार्थान्तरम् । कुतः ? मम स्वत्त्वमुत्पन्नं मम स्वत्त्वं विनष्टमिति प्रतीतेः ।

(उ०) तन्न । तस्यानतिरिक्तत्वादिति । तथाहि—यथेष्टविनियोगयोग्यत्वस्य स्वत्वरूपत्वात्, तदवच्छेदकं च—प्रतिग्रहादिलब्धत्वमेवेति । तस्मात् स्वत्वमपि न पदार्थान्तरम् । तथाच सप्तैव पदार्था इत्यर्थात् सिद्धम् ॥

४ विधेर्लक्षणं प्रतिपाद्य प्राभाकारमतप्रदर्शनपुरस्सरं तन्मतं खण्डनीयम् ॥ ३ ॥

(प्र०) अयमत्राभिसन्धिः—प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः, तत्प्रतिपादको लिङादिर्वा । वाकारोऽनास्थार्थो बोध्यः ।

तत्र कार्यताज्ञानं विधौ प्रवर्तकमिति प्राभाकराः । तेषामयमाशयः—कृत्यसाध्ये चन्द्रमण्डलानयनादौ प्रवृत्तेरदर्शनात्, कृतिसाध्ये भोजनपाकादौ प्रवृत्तेर्दर्शनाच्च कार्यताज्ञानं प्रवर्तकमित्युपपन्नम् ।

नच विषभक्षणादौ प्रवृत्तिप्रसङ्गः कार्यताज्ञानस्य तत्रापि सत्त्वादिति वाच्यम् । इष्टसाधनतालिङ्गककृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालशुचिजीवनत्वनिमित्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानजन्यस्य नित्यनैमित्तिकस्थले प्रवर्तकत्वात । न चानुगम इति वाच्यम् । स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानुगतत्वादिति । तस्मात्कार्यतात्ज्ञानं विधौ प्रवर्तकमिति संक्षेपात्सिद्धम् ।

(ड०)मैवम् । लाघवेन कृतिसाध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रवर्तकत्वादिति ।

अयम्भावः—त्वन्मते प्रवृत्तिकारणतावच्छेदकस्य जन्यत्वादिघटितत्वात्, जन्यत्वस्य तन्निष्ठान्यथासिद्ध्यनिरूपकत्वे सति तदव्यवहितोत्तरत्वरूपतया महद्गौरवम् । मन्मते तु कृतिसाध्यत्वविशिष्टेष्टसाधनत्वस्य कारणतावच्छेदकत्वाल्लाघवमेवेत्यर्थः । न च नित्ये इष्टसाधनत्वाभावादप्रवृत्तिप्रसंग इति वाच्यम् । तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात् । तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङ्गाद्यर्थः-इत्यन्यत्र विस्तरः ।।

५ आख्यातस्य "कर्तरि शक्ति"रिति मतं निरस्य स्वमतमुपन्यसनीयम् ।

(प्र०)अयम्भावः—देवदत्तः पचतीत्यत्र कर्तरि शक्तिरिति वैयाकरणाः । तेषामयमाशयः—पचतीत्यत्र पाकानुकूलव्यापारकर्तुः देवदत्तेन सहाभेदान्वयः । तथाच पाकानुकूलव्यापारकर्त्रभिन्नो देवदत्त इति तन्मतेन शाब्दबोधः ।

(ड०) तच्च गौरवान्न युज्यते । किन्तु कृतौ शक्तिर्लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते । न च "अनभिहिते" इति शासनाद्देवदत्तपदे तृतीया स्यादिति वाच्यम् । कर्तृसंख्यानभिधानस्य सूत्रोपदेशात । अयमाशयः—

भिन्नभिन्नकर्मणि बहवः कर्तारो भविष्यन्ति तेन गौरवमायाति, परं सर्वेष्वपि तेषु कृतिस्त्वेकैव, अतो लाघवात्कृतावेव शक्तिरिति सम्यक् । एवञ्च सूत्रशासनात अनुक्ते कर्तरि तृतीया भवतीति नियमभङ्गो भविष्यति, तदपि न, कर्तृनिष्ठा यैकत्वसंख्या तदनभिधाने एव तस्याः सूत्रे विधानादतो न व्यभिचारः । तस्मात् कृतावेव लाघवाच्छक्तिरस्त्विति किं तथाऽऽस्थामाडम्बरेणेत्यन्यत्र व्यासः ।।

६ तत्त्वज्ञानस्य मुक्तिसाधनत्वे किं प्रमाणम् !

(प्र०) ननु "काशीमरणान्मुक्ति"रिति, "तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महात्मुने"] इतिश्रुतिस्मृत्योरन्यस्यापि तत्प्राप्तिहेतोः प्रतिपादनात् कथं तत्र पूज्येन भगवताऽक्षपादेन तत्त्वज्ञानस्यैव मुक्तिहेतुत्वं प्रतिपादितमिति चेत् ।

(उ०) न । "तमेव विदित्वातिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय" इति श्रुत्या तत्त्वज्ञानस्यव मिथ्याज्ञाननाशद्वारा मुक्तिसाधनत्वात् , एवकारेण साधनान्तरनिषेधाच्च । अत एव "काशीमरणान्मुक्ति"—रित्यत्र प्रयोजकत्ववर्णनमेव ग्रन्थकृतां संगच्छते । किञ्च

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।।
अभ्यासात्पक्वविज्ञानो कैवल्यं लभते नरः ।।

इत्यादिना कर्मणोऽपि ज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैव कर्मणो मोक्षसाधनत्वं नतु साक्षात् । अतः साधूक्तं=मुनिना "तत्त्वज्ञानान्निश्रेयसाधिगमः" इति ।।

इति न्यायाचार्य श्री १०८ दुण्ढिराजशास्त्रिचरणान्तेवासि-
अज्ञेयोपाह्व-बालकवि-केवलानन्दशर्मविरचिते
तर्कमकरन्दे तुरीयचषकः ।।

समाप्तश्चायं निबन्धः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाकवि-विशाखदत्त-विरचितं

मुद्राराक्षसनाटकम्।

व्याकरण-काव्यतीर्थेन

ठक्कुरोपनामक पं० श्रीकनकलाल शर्म्मणा मैथिलेन

विरचितया

भावबोधिन्याख्यया संस्कृतव्याख्यया आशुबोधिन्याख्यया

हिन्दीव्याख्यया समलङ्कृतम्।

महाकवि-श्री विशाखदत्त विरचित मुद्राराक्षस नाटक प्राच्य और पाश्चात्य साहित्य जगत में सुप्रसिद्ध है। इसमें राजनीतिज्ञ कौटिल्य चाणक्य की बुद्धि पराकाष्ठा प्राप्त कर चुकी है। इस उदात्त नाटक में महाकवि विशाखदत्त ने वीररस के ठांचे में कठिन कठिन शब्दों तथा विस्तृत समासयुक्त वाक्यों में चाणक्य—चन्द्रगुप्त राक्षस आदि पात्रों की प्रबन्धरूपमें सुन्दर वाचनिका बनाई है अब तक इस दुरूह नाटक के ऊपर कोमल मा तवाले छात्रों के उपयोगि कोई भी विस्तृत और विशद व्याख्या आज तक दृष्टि में नहीं आती थी। इसी कमी को पूर्ण करने के लिये मैथिल पण्डित कनकलाल ठक्कुर काव्य—व्याकरण-तीर्थजीने सभी कठिन कठिन समासोंको तोड़ताड़ कर नाटकीय व्याख्या के ढङ्ग पर बीज, बिन्दु, पताका रसोल्लेख और अलङ्कारों का समन्वय करते हुये भावबोधिनी नामक अतिशय सुन्दर और प्राञ्जल व्याख्या बनाई है। इस द्वितीय संस्करण की छपाई, सफाई और कागजकी सुन्दरता देखकर आपलोग मुग्ध हो जावेंगे। इस संस्करण में अतिशय सुगम आशुबोधिनी हिन्दी टीका भी कर दीगई है जिससे ग्रन्थ की उपयोगिता और भी बढ़ गई है अब तक इसका आनन्द संस्कृत जानने वाले ही ले सकते थे किन्तु हिन्दी टीका हो जानेसे यह हिन्दी जानने वालों का भी प्रेममाजन हो गया है।

इन विशेषताओं के होते हुए भी दाम बहुत कम अर्थात वही २) दो रुपया रखा है। विद्यार्थियों को कमीशन काटकर केवल १॥=) एक रुपये दस आने में प्राप्त होगा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिज्ञानशाकुन्तल

'किशोरकेलि' नाम्नी संस्कृतव्याख्या

तथा

'रुचिरा' नाम भाषाटीका सहित।

संस्कृतसाहित्यप्रेमियों!

आप महानुभावों को मालूम होगा कि महाकवि 'कालिदास' विरचित जितने दृश्य श्रव्य नाटक हैं उनमें 'शाकुन्तल नाटक' ही को सबसे उच्चस्थान प्राप्त हुआ है। अनुभवी महानुभावों ने कहा है—"काव्येषु नाटकं रम्यम्, तत्रापि च शाकुन्तला" इससे मालूम होता है कि वस्तुतः श्रीवाग्देवीने स्वयं प्रबन्ध रूपसे कालिदासकी वाणीमें आविर्भूत होकर संस्कृत साहित्यके गौरवको बढ़ाया है। ऐसे रसभावोज्ज्वल नाटकके ऊपर नानाप्रान्तों से नानाप्रकार की टीकाएँ निकल चुकी हैं। परन्तु इतनी टीकाओं के होने पर भी सर्वसाधारण बालकों की सुविधा नहीं देखी जाती थी। अतः परीक्षार्थियों की इस असुविधा के निवारण करने के लिये कविताकिकोत्कल-पण्डित-श्रीनवकिशोरशास्त्री, काव्यव्याकरण-तीर्थ, काव्यसाहित्यशास्त्राचार्य—न्यायवैशेषिकवेदान्तशास्त्रीजीने वैदर्भीरीति तथा प्रसादगुणरञ्जित 'किशोरकेलि' नाम की संस्कृत टीका तथा 'रुचिरा' नाम की भाषा टीका बनाई है। जितनी टीका टिप्पणी इस ग्रन्थ पर छपी हैं उन सबसे उत्तम परीक्षाके ढङ्ग पर यह टीका बना है। किशोर (बालक) लोगोंका केलि अर्थात् खेल जैसा आनन्द बढ़ाने वाला होता है; ऐसी ही यह 'किशोरकेलि' टीका किशोर अवस्था वाले छात्रों के लिये अत्यन्त आनन्ददायिनी हुई है।

साधारण सस्ते संस्करण ७४० पृष्ठों का मूल्य लागत मात्र केवल १॥।)

विद्यार्थियों को कमीशन काट कर केवल रु० १-६-० में मिलेगा। तथा विस्तृत भूमिका, महाभारतीय तथा पद्मपुराणोक्त शकुन्त आख्यान, विस्तृत नाटकीय पदार्थ सूची (जो किसी भी संस्करण में नहीं है) सहित राजसंस्करण का मूल्य १॥।=) कमीशन काट कर १॥) है।

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काशीस्थ ग० सं० कालेज सर्वविधमध्यमचतुर्थखण्डोपयोगि-

'प्रबोधिनी' और 'प्रकाश' दो टीकाओं के सहित

स्वप्नवासवदत्त नाटक-

टीकाकार काशी के दो धुरन्धर विद्वान्—

पं० अनन्तरामशास्त्री वेताल साहित्याचार्य,

पं० जगन्नाथशास्त्री होशिङ्ग साहित्याचार्य ।

अन्य संस्करणों से इस संस्करण की विशेषतायें-

मूल ग्रन्थ की कठिनाई को दूर करने के लिए "प्रबोधिनी" नामक संस्कृत व्याख्या में अन्वय, विग्रह, पर्याय, सुन्दर अर्थ, भावार्थ, कोश, अलङ्कार, छन्द, नाट्य-लक्षण आदि विषय और साथ ही साथ "प्रकाश" नामक प्राञ्जल भाषाटीका भी रख दी गयी है । इस कारण यह ग्रन्थ इतना सरल हो गया है कि साधारण बुद्धि सम्पन्न विद्यार्थी भी बिना गुरु के पास गये ही इसे पढ़ भली भांति समझ सकता है।

सब से बड़ी बात-

तो यह है कि ग्रन्थ के आदि में अति सरल संस्कृतमयी विस्तृत भूमिका भी दी गयी है । जिससे ग्रन्थकार का समय उसकी विशेषतायें और प्रस्तुत ग्रन्थ की मननीय समालोचना का काम बड़े सरल ढंग से हल हो गया है । कथासरित्सागर, तथा बृहत्कथामञ्जरी के वे तरंग भी उद्धृत कर दिये गये हैं कि जिनके कथानक पर इस ग्रन्थ की सृष्टि हुई है । इन विशेषताओं के अतिरिक्त संस्कृत तथा भाषा दोनों ही में सरल रीति से कथासार भी लिख दिया गया है, जिससे संक्षेप में इसका कथानक समझने में बडी सरलता हो गई है ।

विश्वास रखिए-

परीक्षोपयोगी संपूर्ण विषयों से युक्त "प्रबोधिनी" तथा "प्रकाश" २ टीका से युक्त स्वप्नवासवदत्त नाटक का दुसरा कोई भी संस्करण नही हैं । गवर्नमेन्ट कालेज काशी के माननीय महामहोपाध्याय एवं सुयोग्य प्रतिष्ठित विद्वानो ने मुक्तकंठ से इसी संस्करण की प्रशंसा की है । विद्यार्थियों के लिए यही ग्रन्थ उपयोगी है ।

३८४ पृ० की सजिल्द पुस्तक का मूल्य १), कमीशन काट कर ॥!-) है । यदि आपने अभी तक इसे न खरीदा हो तो शीघ्र खरीद लीजिए ।

प्राप्तिस्थानम्-चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।

Kirtikant Sharma Collection, Najafgarh